# अध्यायः १३

# क्षेत्रक्षेत्रज्ञविभागयोगः

**[1]अवतरणिका**

सप्तमेऽध्याये सूचिते द्वे प्रकृती ईश्वरस्य। त्रिगुणात्मिकाऽष्टधा भिन्नाऽपरा संसार-हेतुत्वात्।

परा चान्या जीव-भूता क्षेत्रज्ञ-लक्षणेश्वरात्मिका।

याभ्यां प्रकृतिभ्याम् ईश्वरो जगदुत्पत्ति-स्थिति-लय-हेतुत्वं प्रतिपद्यते।

तत्र क्षेत्र-क्षेत्रज्ञ-लक्षण-प्रकृति-द्वय-निरूपण-द्वारेण तद्वतः ईश्वरस्य तत्त्व-निर्धारणार्थं क्षेत्राध्याय आरभ्यते।

अतीतानन्तराध्याये च अद्वेष्टा सर्वभूतानाम्(गी १२.१३) इत्यादिना यावदध्याय-परिसमाप्तिः तावत् तत्त्व-ज्ञानिनां संन्यासिनां निष्ठा यथा ते वर्त्तन्ते इत्येतदुक्तम्। केन पुनस्ते तत्व-ज्ञानेन युक्ता यथोक्त-धर्माचरणाद्भगवतः प्रिया भवन्तीति एवमर्थश्चायमध्याय आरभ्यते।

प्रकृतिश्च त्रिगुणात्मिका सर्व-कार्य-करण-विषयाकारेण परिणता पुरुषस्य भोगापवर्गार्थ-कर्त्तव्यतया देहेन्द्रियाद्याकारेण संहन्यते। सोऽयं सङ्घात इदं शरीरम्। तदेतद्भगवानुवाच -

[1] छ६-२५

**अर्जुन उवाच -**

**प्रकृतिं पुरुषं चैव क्षेत्रं क्षेत्रज्ञमेव च**

**एतद्वेदितुमिच्छामि ज्ञानं ज्ञेयं च केशव।। १ ।।**

केशव प्रकृतिं पुरुषं चैव क्षेत्रं क्षेत्रज्ञमेव च ज्ञानं ज्ञेयं च एतद्वेदितुमिच्छामि ।। १ ।।

**श्री भगवानुवाच -**

**इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते।**

**एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः।। १।।**

इदमिति। **इदं** इति सर्वनाम्नोक्तं विशिनष्टि **शरीरम्** इति। हे **कौन्तेय**

१) क्षत-त्राणात् २) क्षयात् ३) क्षरणात् ४) क्षेत्रवद्वा अस्मिन्कर्म-फल-निष्पत्तेः[2] **क्षेत्रमिति**।

[2] निर्वृत्तेरिति वा।

इतिशब्द एवं-शब्द-पदार्थकः क्षेत्रमित्येवम् **अभिधीयते** कथ्यते।

**एतत्** शरीरं क्षेत्रं **यो** **वेत्ति** विजानाति आपाद-तल-मस्तकं ज्ञानेन विषयी करोति,

स्वाभाविकेन औपदेशिकेन वा वेदनेन विषयी करोति विभागशः **तं** वेदितारं **प्राहुः** कथयन्ति **क्षेत्रज्ञ**

**इति।**

इति-शब्द एवं-शब्द-पदार्थक एव पूर्ववत्, क्षेत्रज्ञ इत्येवमाहुः।

के **तद्विदः** तौ क्षेत्र-क्षेत्रज्ञौ ये विदन्ति ते तद्विदः।। १ ।।

एवं क्षेत्रक्षेत्रज्ञौ उक्तौ किं एतावन्मात्रेण ज्ञानेन ज्ञातव्यौ इति न इति उच्यते -

**क्षेत्रज्ञं चापि मां विद्धि सर्व-क्षेत्रेषु भारत।**

**क्षेत्र-क्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम।। २ ।।**

क्षेत्रज्ञमिति। **क्षेत्रज्ञं** यथोक्त-लक्षणं **चापि** **मां** परमेश्वरमसंसारिणं **विद्धि** जानीहि।

**सर्व-क्षेत्रेषु** यः क्षेत्रज्ञो ब्रह्मादि-स्तम्ब-पर्यन्तानेक-क्षेत्रोपाधि-प्रविभक्तः तं निरस्त-सर्वोपाधि-भेदं सदसदादि-शब्द-प्रत्ययागोचरं विद्धीत्यभिप्रायः।

हे **भारत** यस्मात् क्षेत्र-क्षेत्रज्ञेश्वर-याथात्म्य-व्यतिरेकेण न ज्ञान-गोचरमन्यदवशिष्टमस्ति तस्मात् **क्षेत्रक्षेत्रज्ञयोः** ज्ञेय-भूतयोः **यज्ज्ञानं** क्षेत्र-क्षेत्रज्ञौ येन ज्ञानेन विषयी क्रियेते **तज्ज्ञानं** सम्यग्ज्ञानमिति **मतम्** अभिप्रायः **मम** ईश्वरस्य विष्णोः।।

**आक्षेपः**

ननु सर्वक्षेत्रेष्वेक एवेश्वरो नान्यः तद्व्यतिरिक्तो भोक्ता विद्यते चेत्, तत ईश्वरस्य संसारित्वं प्राप्तम्,

ईश्वरव्यतिरेकेण वा संसारिणोऽन्यस्याभावात् संसाराभाव-प्रसङ्गः। तच्चोभयमनिष्टम्।

बन्ध-मोक्ष-तद्धेतु-शास्त्रानर्थक्य-प्रसङ्गात्। प्रत्यक्षादि-प्रमाण-विरोधाच्च।

प्रत्यक्षेण तावत् सुख-दुःख-तद्धेतु-लक्षणः संसार उपलभ्यते।

जगद्वैचित्र्योप-लब्धेश्च, धर्माधर्म-निमित्तः संसारोऽनुमीयते। सर्वमेतदनुपपन्नम् आत्मेश्वरैकत्वे।।

**समाधानम्**

न। ज्ञानाज्ञानयोरन्यत्वेनोपपत्तेः[3]। दूरमेते विपरीते विषूची अविद्या या च विद्येति ज्ञाता (कठ. १.२.४)।

तथा च तयोर्विद्याविद्या-विषययोः फल-भेदोऽपि विरुद्धो निर्दिष्टः श्रेयश्च प्रेयश्च (कठ. १.२.२) इति।

विद्या-विषयः श्रेयः, प्रेयस्त्वविद्या-कार्यमिति।

---

[3] अन्यत्वोपपत्तेः इति वा। ज्ञानाज्ञानयोरन्यत्वेन भिन्नत्वेन हेतुना उपपत्तेः बन्धमोक्षादेः सर्वस्योपपन्नत्वादित्यर्थः।

तथा च व्यासः - द्वाविमावथ पन्थानौ[4] (म.भा.शां. २४१.६) इत्यादि, इमौ द्वावेव पन्थानौ[5] इत्यादि च। इह च द्वे निष्ठे उक्ते (गी ३.२)।

अविद्या च सह कार्येण विद्यया हातव्येति श्रुति-स्मृति-न्यायेभ्योऽवगम्यते।।

श्रुतयस्तावत् - इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिः (के. २.५) तमेवं विद्वानमृत इह भवति। नान्यः पन्था विद्यतेऽयनाय (श्वे. ३.८) विद्वान्न बिभेति कुतश्चन (तै. २.४)।

अविदुषस्तु - अथ तस्य भयं भवति (तै. २.७) अविद्यायामन्तरे वर्त्तमानाः (मु. १.२.५, कठ. १.२.५) ब्रह्म वेद ब्रह्मैव भवति (मु. ३.२.९) अन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुरेवं स देवानाम् (बृ. १.४.१०) आत्मविद् यः स इदं सर्वं भवति (बृ. १.४.१०) यदा चर्मवत् (श्वे. ६.२०) इत्याद्याः सहस्रशः।।

---

4 यत्र वेदाः प्रतिष्ठिताः। प्रवृत्ति-लक्षणो धर्मो निवृत्त□विभाषितः इति शेषः।

5 अनुनिष्क्रान्ततरौ भवतः क्रिया-पथ□व पुरस्तात् संन्यास□त्तरेण इति शेषः।

स्मृतयश्च - अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः (गी ५.१५), इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः (गी ५.१९) समं पश्यन् हि सर्वत्र (गी १३.२८) इत्याद्याः।।

न्यायतश्च - सर्पान् कुशाग्राणि तथोदपानं ज्ञात्वा मनुष्याः परिवर्जयन्ति।

अज्ञानतः तत्र पतन्ति केचिद् ज्ञाने फलं पश्य तथा विशिष्टम्। (म.भा.शा. २०१.१६)।

तथा च देहादिष्वात्म-बुद्धिरविद्वान् रागद्वेषादि-प्रयुक्तो धर्माधर्मानुष्ठानकृद् जायते म्रियते च इत्यवगम्यते, देहादि-व्यतिरिक्तात्म-दर्शिनो रागद्वेषादि-प्रहाणापेक्ष-धर्माधर्म-प्रवृत्त्युपशमाद् मुच्यन्ते इति न केनचित् प्रत्याख्यातुं शक्यं न्यायतः।।

तत्रैवं सति क्षेत्रज्ञस्येश्वरस्यैव सतोऽविद्याकृतोपाधि-भेदतः संसारित्वमिव भवति,

यथा देहाद्यात्मत्वमात्मनः। सर्वजन्तूनां हि प्रसिद्धो देहादिष्वनात्मस्वात्म-भावो निश्चितः अविद्याकृतः।

यथा स्थाणौ पुरुष-निश्चयः। न चैतावता पुरुष-धर्मः स्थाणोर्भवति स्थाणु-धर्मो वा पुरुषस्य।

तथा न चैतन्य-धर्मो देहस्य, देह-धर्मो वा चैतन्यस्य।

सुख-दुःख-मोहात्मकत्वादिरात्मनो न युक्तोऽविद्याकृतत्वाविशेषाद्, जरामृत्युवत्।।

**आक्षेपः**

न। अतुल्यत्वादिति चेत्। स्थाणु-पुरुषौ ज्ञेयावेव सन्तौ ज्ञात्रा अन्योन्यस्मिन् अध्यस्तावविद्यया।

देहात्मनोस्तु ज्ञेय-ज्ञात्रोरेवेतरेतराध्यास इति न समो दृष्टान्तः।

अतो देह-धर्मो ज्ञेयोऽपि ज्ञातुरात्मनो भवतीति चेत्।।

**समाधानम्**

न। अचैतन्यादि-प्रसङ्गात्[6]। यदि हि ज्ञेयस्य देहादेः क्षेत्रस्य धर्माः सुख-दुःख-मोहेच्छादयो ज्ञातुर्भवन्ति तर्हि ज्ञेयस्य क्षेत्रस्य धर्माः केचनाऽऽत्मनो भवन्ति अविद्याध्यारोपिताः, जरामरणादयस्तु न भवन्तीति विशेष-हेतुर्वक्तव्यः।

[6] यदि देहधर्माः आत्मनः स्युः तर्हि देहधर्मो जाड्यमपि आत्मनः स्यात्।

न भवन्ति[7] इत्यस्त्यनुमानम् अविद्याध्यारोपितत्वाज्जरादिवदिति, हेयत्वादुपादेयत्वाच्च इत्यादि।

तत्रैवं सति कर्तृत्व-भोक्तृत्व-लक्षणः संसारो ज्ञेयस्थो ज्ञातर्यविद्ययाऽध्यारोपित इति न तेन ज्ञातुः किञ्चिद् दुष्यति। यथा बालैरध्यारोपितेनाकाशस्य तल-मलिनत्वादिना।

एवं च सति सर्वक्षेत्रेष्वपि सतो भगवतः क्षेत्रज्ञस्येश्वरस्य संसारित्व-गन्ध-मात्रमपि नाशङ्क्यम्।

न हि क्वचिदपि लोके अविद्याध्यस्तेन धर्मेण कस्यचिदुपकारोऽपकारो वा दृष्टः।।

यत्तूक्तं न समो दृष्टान्त इति, तदसत्।

कथम् अविद्याध्यास-मात्रं हि दृष्टान्त-दार्ष्टान्तिकयोः साधर्म्यं विवक्षितम्। तन्न व्यभिचरति।

यत्तु ज्ञातरि व्यभिचरतीति मन्यसे तस्याप्यनैकान्तिकत्वं दर्शितं जरादिभिः।।

---

[7] सुखादयः आत्मधर्माः न भवन्ति इति तवपक्षे अपि विशेषहेतुः नास्ति इत्याशङ्क्य परिहरति नेति। सुखादयः आत्मधर्माः न भवन्ति इत्यत्र विशेषहेतुः अनुमानमस्ति इत्यर्थः।

**आक्षेपः**

अविद्यावत्वात् क्षेत्रज्ञस्य संसारित्वमिति चेत्।।

**समाधानम्**

न। अविद्यायाः तामसत्वात्। तामसो हि प्रत्यय आवरणात्मकत्वाद् अविद्या - विपरीत-ग्राहकः, संशयोपस्थापको वा, अग्रहणात्मको वा। विवेक-प्रकाश-भावे तदभावात्, तामसे चाऽऽवरणात्मके तिमिरादि-दोषे सत्यग्रहणादेः अविद्या-त्रयस्योपलब्धेः।

**आक्षेपः**

अत्राह - एवं तर्हि ज्ञातृ-धर्मोऽविद्या।।

**समाधानम्**

न। करणे चक्षुषि तैमिरिकादि-दोषोपलब्धेः। यत्तु मन्यसे ज्ञातृ-धर्मोऽविद्या तदेव चाविद्या-धर्मवत्वं क्षेत्रज्ञस्य संसारित्वम्। तत्र यदुक्तम् ईश्वर एव क्षेत्रज्ञो न संसारीत्येतदयुक्तम् इति। तन्न।

यथा करणे चक्षुषि विपरीत-ग्राहकादि-दोषस्य दर्शनात्।

न विपरीतादि-ग्रहणं तन्निमित्तो वा तैमिरिकत्वादि-दोषः ग्रहीतुः।

चक्षुषः संस्कारेण तिमिरेऽपनीते ग्रहीतुरदर्शनान्न ग्रहीतुः धर्मो यथा, तथा सर्वत्रैवाग्रहण-विपरीत-संशय-

प्रत्ययाः तन्निमित्ताः करणस्यैव कस्यचिद्भवितुमर्हन्ति, न ज्ञातुः क्षेत्रज्ञस्य।

संवेद्यत्वाच्च तेषां प्रदीप-प्रकाशवन्न ज्ञातृ-धर्मत्वम्। संवेद्यत्वादेव स्वात्म-व्यतिरिक्त-संवेद्यत्वम्।

सर्व-करण-वियोगे च कैवल्ये सर्व-वादिभिरविद्यादि-दोषवत्त्वानभ्युपगमात्।

आत्मनो यदि क्षेत्रज्ञस्याग्न्युष्णवत् स्वो धर्मः, ततो न कदाचिदपि तेन वियोगः स्यात्।

अविक्रियस्य च व्योमवत् सर्वगतस्यामूर्त्तस्यात्मनः केनचित् संयोग-वियोगानुपपत्तेः।

सिद्धं क्षेत्रज्ञस्य नित्यमेव ईश्वरत्वम्। अनादित्वाद् निर्गुणत्वात् (गी १३.३१) इत्यादीश्वर-वचनाच्च।।

**आक्षेपः**

ननु एवं सति संसार-संसारित्वाभावे शास्त्रानर्थक्यादि-दोषः स्यादिति चेत्।।

**समाधानम्**

न। सर्वैरभ्युपगतत्वात्। सर्वैर्ह्यात्मवादिभिरभ्युपगतो दोषो नैकेन परिहर्त्तव्यो[8] भवति।

**आक्षेपः**

कथमभ्युपगम्यत इति।

**समाधानम्**

मुक्तात्मनां हि संसार-संसारित्व-व्यवहाराभावः सर्वैरात्मवादिभिरिष्यते। न च तेषां शास्त्रानर्थक्यादि-दोष-प्राप्तिरभ्युपगता। तथा नः क्षेत्रज्ञानामीश्वरैकत्वे सति शास्त्रानर्थक्यं भवतु। अविद्या-विषये चार्थवत्वं, यथा द्वैतिनां सर्वेषां बन्धावस्थायामेव शास्त्राद्यर्थवत्वं, न मुक्तावस्थायाम्, एवम्।।

**आक्षेपः**

ननु आत्मनो बन्ध-मुक्तावस्थे परमार्थत एव वस्तु-भूते द्वैतिनां नः सर्वेषाम्। अतो हेयोपादेय-तत्साधन-सद्भावे शास्त्राद्यर्थवत्वं स्यात्।

---

[8] परिहरिष्यते इति वा।

अद्वतिनां पुनः द्वैतस्य अपरमार्थत्वादविद्या-कृतत्वाद् बन्धावस्थायाश्चाऽऽत्मनोऽपरमार्थत्वे निर्विषयत्वात् शास्त्राद्यानर्थक्यमिति चेत्।

**समाधानम्**

न। आत्मनोऽवस्था-भेदानुपपत्तेः। यदि तावदात्मनो बन्ध-मुक्तावस्थे युगपत् स्यातां क्रमेण वा। युगपत्तावद्विरोधान्न सम्भवतः स्थिति-गती इव एकस्मिन्। क्रम-भावित्वे च निर्निमित्तत्वेऽनिर्मोक्ष-प्रसङ्गः। अन्य-निमित्तत्वे च स्वतोऽभावाद् अपरमार्थत्व-प्रसङ्गः। तथा च सत्यभ्युपगम-हानिः।।

किञ्च बन्ध-मुक्तावस्थयोः पौर्वापर्य-निरूपणायां बन्धावस्था पूर्वं प्रकल्प्या, अनादिमत्यन्तवती च, तच्च प्रमाण-विरुद्धं। तथा मोक्षावस्था आदिमत्यनन्ता च प्रमाण-विरुद्धैवाभ्युपगम्यते। न चावस्थावतोऽवस्थान्तरं गच्छतो नित्यत्वमुपपादयितुं शक्यम्।

अथ अनित्यत्व-दोष-परिहाराय बन्ध-मुक्तावस्था-भेदो न कल्प्यते, अतो द्वैतिनामपि शास्त्रानर्थक्यादि-दोषोऽपरिहार्य एवेति समानत्वान्नाद्वैत-वादिना परिहर्त्तव्यो दोषः।।

न च शास्त्रानर्थक्यं, यथा-प्रसिद्धाविद्वत्पुरुष-विषयत्वाच्छास्त्रस्य।

अविदुषां हि फल-हेत्वोः[9] अनात्मनोरात्म-दर्शनम्, न विदुषाम्।

विदुषां हि फल-हेतुभ्यामात्मनोऽन्यत्व-दर्शने सति तयोरहमित्यात्म-दर्शनानुपपत्तेः।

न ह्यत्यन्त-मूढ उन्मत्तादिरपि जलाग्न्योः छाया-प्रकाशयोर्वा ऐकात्म्यं पश्यति, किमुत विवेकी।

तस्मान्न विधि-प्रतिषेध-शास्त्रं तावत्फल-हेतुभ्यामात्मनोऽन्यत्व-दर्शिनो भवति।

न हि देवदत्त त्वमिदं कुरु इति कस्मिंश्चित् कर्मणि नियुक्ते विष्णु-मित्रः अहं नियुक्तः इति तत्रस्थो नियोगं श्रृण्वन्नपि प्रतिपद्यते। नियोग-विषय-विवेकाग्रहणात्तु उपपद्यते प्रतिपत्तिः। तथा फल-हेत्वोरपि।

**आक्षेपः**

ननु प्राकृत[10]-सम्बन्धापेक्षया युक्तैव प्रतिपत्तिः शास्त्रार्थ-विषया फल-हेतुभ्याम् अन्यात्म-विषय-दर्शनेऽपि सति इष्ट-फल-हेतौ प्रवर्त्तितोऽस्मि, अनिष्ट-फल-हेतोश्च निवर्त्तितोऽस्मि इति।

---

[9] स्थूलसूक्ष्मशरीरयोः।

[10] प्रकृतेर्जातो ममाभिमानरूपः देहे देहिनः। यथा गृहे गृहिणः गृहाद्भिन्नस्यापि।

यथा पितृ-पुत्रादीनाम् इतरेतरात्मान्यत्व-दर्शने सत्यपि अन्योन्य-नियोग-प्रतिषेधार्थ-प्रतिपत्तिः।।

**समाधानम्**

न। व्यतिरिक्तात्म-दर्शन-प्रतिपत्तेः प्रागेव फल-हेत्वोरात्माभिमानस्य सिद्धत्वात्।

प्रतिपन्न-नियोग-प्रतिषेधार्थो हि फल-हेतुभ्यामात्मनोऽन्यत्वं प्रतिपद्यते, न पूर्वम्।

तस्माद् विधि-प्रतिषेध-शास्त्रमविद्वद्विषयमिति सिद्धम्।।

**आक्षेपः**

ननु स्वर्ग-कामो यजेत, कलञ्जं न भक्षयेत् इत्यादौ आत्म-व्यतिरेक-दर्शिनामप्रवृत्तौ,

केवल-देहाद्यात्म-दृष्टीनां च, अतः कर्त्तुरभावात् शास्त्रानर्थक्यमिति चेत्।

**समाधानम्**

न। यथा-प्रसिद्धित एव प्रवृत्ति-निवृत्त्युपपत्तेः। ईश्वर-क्षेत्रज्ञैकत्व-दर्शी ब्रह्मवित् तावन्न प्रवर्त्तते।

तथा नैरात्म्यवाद्यपि नास्ति परलोकः इति न प्रवर्त्तते।

यथा-प्रसिद्धितस्तु विधि-प्रतिषेध-शास्त्र-श्रवणान्यथानुपपत्त्या अनुमितात्मास्तित्वः[11] आत्म-विशेषानभिज्ञः कर्म-फल-सञ्जात-तृष्णः श्रद्दधानतया च प्रवर्त्तते, इति सर्वेषां नः प्रत्यक्षम्। अतो न शास्त्रानर्थक्यम्।।

**आक्षेपः**

विवेकिनामप्रवृत्ति-दर्शनात् तदनुगामिनामप्रवृत्तौ शास्त्रानर्थक्यमिति चेत्।

**समाधानम्**

न। कस्यचिदेव विवेकोपपत्तेः। अनेकेषु हि प्राणिषु कश्चिदेव विवेकी स्यात्, यथेदानीम्।

न च विवेकिनमनुवर्त्तन्ते मूढाः रागादि-दोष-तन्त्रत्वात् प्रवृत्तेः, अभिचारादौ च प्रवृत्ति-दर्शनात्, स्वाभाव्यत्वाच्च प्रवृत्तेः। स्वभावस्तु प्रवर्त्तते (गी ५.१४) इति ह्युक्तम्। तस्मादविद्या-मात्रं संसारो यथा-दृष्टविषयः एव। न क्षेत्रज्ञस्य केवलस्य अविद्या तत्कार्यं च।

न च मिथ्या-ज्ञानं परमार्थ-वस्तु दूषयितुं समर्थम्। न हि ऊषर-देशं स्नेहेन पङ्कीकर्त्तुं शक्नोति मरीच्युदकम्। तथा अविद्या क्षेत्रज्ञस्य न किञ्चित् कर्त्तुं शक्नोति।

[11] अनुमितमात्मास्तित्त्वं येन सः।

अतश्चेदमुक्तं क्षेत्रज्ञं चापि मां विद्धि(गी १३.२), अज्ञानेनावृतं ज्ञानम् (गी ५.१५) इति च।।

**आक्षेपः**

अथ किमिदं संसारिणामिव अहं एवम् ममैवेदम् इति पण्डितानामपि।।

**समाधानम्**

श्रृणु। इदं तत् पाण्डित्यं यत् क्षेत्रे एवात्म-दर्शनम्। यदि पुनः क्षेत्रज्ञम् अविक्रियं पश्येयुः ततो न भोगं कर्म वा आकाङ्क्षेयुः मम स्यात् इति। विक्रियैव भोग-कर्मणी। अथैवं सति, फलार्थित्वादविद्वान्प्रवर्त्तते। विदुषः पुनरविक्रियात्म-दर्शिनः फलार्थित्वाभावात् प्रवृत्त्यनुपपत्तौ कार्य-करण-सङ्घात-व्यापारोपरमे निवृत्तिरुपचर्यते।।

इदं चान्यत् पाण्डित्यं कस्यचित् - अस्तु क्षेत्रज्ञ ईश्वरः एव, क्षेत्रं चान्यत् क्षेत्रज्ञस्य विषयः। अहं तु संसारी, सुखी, दुःखी च। संसारोपरमश्च मम कर्त्तव्यः क्षेत्र-क्षेत्रज्ञ-विज्ञानेन ध्यानेन चेश्वरं क्षेत्रज्ञं साक्षात् कृत्वा तत्स्वरूपावस्थानेन इति। यश्चैवं बुध्यते यश्च बोधयति नासौ क्षेत्रज्ञः इति।

एवं मन्वानो यः स पण्डितापसदः, संसार-मोक्षयोः शास्त्रस्य चार्थवत्वं करोमीति आत्महा स्वयं

मूढोऽन्यान् च व्यामोहयति शास्त्रार्थ-सम्प्रदाय-रहितत्वात् श्रुत-हानिमश्रुत-कल्पनां च कुर्वन्।

तस्माद् असम्प्रदायवित् सर्व-शास्त्र-विदपि मुर्खवदेवोपेक्षणीयः।।

यत्तूक्तमीश्वरस्य क्षेत्रज्ञैकत्वे संसारित्वं प्राप्नोति, क्षेत्रज्ञानां च ईश्वरैकत्वे संसारिणः अभावात् संसाराभाव-

प्रसङ्ग इति। एतौ दोषौ प्रत्युक्तौ विद्याऽविद्ययोः वैलक्षण्याभ्युप-गमादिति।

कथम् अविद्या-परिकल्पित-दोषेण तद्विषयं वस्तु पारमार्थिकं न दुष्यतीति।

तथा च दृष्टान्तो दर्शितो मरीच्यम्भसोषरदेशो न पङ्की क्रियते इति।

संसारिणोऽभावात् संसाराभाव-प्रसङ्ग-दोषोऽपि संसार-संसारिणोरविद्या-कल्पितत्वोपपत्तया प्रत्युक्तः।।

**आक्षेपः**

ननु अविद्यावत्त्वमेव क्षेत्रज्ञस्य संसारित्व-दोषः। तत्कृतं च दुःखित्वादि प्रत्यक्षमुपलभ्यते इति चेत्।।

**समाधानम्**

न। ज्ञेयस्य क्षेत्र-धर्मत्वात्, ज्ञातुः क्षेत्रज्ञस्य तत्कृतदोषानुपपत्तेः।

यावत् किञ्चित् क्षेत्रज्ञस्य दोष-जातम् अविद्यमानम् आसञ्जयसि[12] तस्य ज्ञेयत्वोपपत्तेः क्षेत्र-धर्मत्वमेव न क्षेत्रज्ञ-धर्मत्वम्।

न च तेन क्षेत्रज्ञो दुष्यति, ज्ञेयेन ज्ञातुः संसर्गानुपपुत्तेः। यदि हि संसर्गः स्यात् ज्ञेयत्वमेव नोपपद्यते।

यद्यात्मनो धर्मोऽविद्यावत्वं दुःखित्वादि च, कथं भोः प्रत्यक्षमुपलभ्यते, कथं वा क्षेत्रज्ञ-धर्मः।

ज्ञेयं च सर्वं क्षेत्रं, ज्ञातैव क्षेत्रज्ञः इत्यवधारिते अविद्या-दुःखित्वादेः क्षेत्रज्ञ-विशेषणत्वं, क्षेत्रज्ञ-धर्मत्वं, तस्य च प्रत्यक्षोपलभ्यत्वम् इति विरुद्धमुच्यतेऽविद्यामात्रावष्टम्भात् केवलम्।।

---

[12] यत्किञ्चित् किञ्चिद्ज्ञत्वादि-दोषगणं आसञ्जयसि सम्भावयसि तस्य सर्वस्यापि ज्ञेयत्वात्।

अत्र आह -

**प्रश्नः**
सा अविद्या कस्येति

**उत्तरम्**
यस्य दृश्यते तस्यैव।

**प्रश्नः**
कस्य दृश्यते इति

**उत्तरम्**
अत्रोच्यते - अविद्या कस्य दृश्यते इति प्रश्नो निरर्थकः।

**प्रश्नः**
कथम्

**उत्तरम्**
दृश्यते चेदविद्या तद्वन्तमपि पश्यसि। न च तद्वत्युपलभ्यमाने सा कस्येति प्रश्नो युक्तः।

न हि गोमत्युपलभ्यमाने गावः कस्येति प्रश्नोऽर्थवान् भवेत्।

**आक्षेपः**

ननु विषमो दृष्टान्तः। गवां तद्वतश्च प्रत्यक्षत्वात् सम्बन्धोऽपि प्रत्यक्ष इति प्रश्नो निरर्थकः।

न तथा अविद्या तद्वान् च प्रत्यक्षौ यतः प्रश्नो निरर्थकः स्यात्।

**समाधानम्**

अप्रत्यक्षेणाविद्यावता अविद्या-सम्बन्धे ज्ञाते किं तव स्यात्

**आक्षेपः**

अविद्याया अनर्थ-हेतुत्वात् परिहर्तव्या स्यात्।

**समाधानम्**

यस्याविद्या स तां परिहरिष्यति।

**आक्षेपः**

ननु ममैव अविद्या।

**समाधानम्**

जानासि तर्ह्यविद्यां तद्वन्तं चात्मानम्।

**आक्षेपः**

जानामि, न तु प्रत्यक्षेण।

**समाधानम्**

अनुमानेन[13] चेज्ज्ञानासि कथं सम्बन्ध-ग्रहणम् न हि तव ज्ञातुः ज्ञेय-भूतया अविद्यया तत्काले सम्बन्धः ग्रहीतुं शक्यते। अविद्यायाः विषयत्वेन एव ज्ञातुः उपयुक्तत्वात्[14]।

न च ज्ञातुरविद्यायाश्च सम्बन्धस्य यो ग्रहीता ज्ञानं चान्यत् तद्विषयं सम्भवति[15] अनवस्था-प्राप्तेः।

यदि ज्ञातापि ज्ञेयसम्बन्धो ज्ञायेत अन्यो ज्ञाता कल्प्यः स्यात्, तस्याप्यन्यः तस्याप्यन्य इत्यनवस्था अपरिहार्या। यदि पुनरविद्या ज्ञेया अन्यद्वा ज्ञेयं ज्ञेयमेव। तथा ज्ञातापि ज्ञातैव न ज्ञेयं भवति।

यदा चैवम् अविद्या-दुःखित्वाद्यैर्न ज्ञातुः क्षेत्रज्ञस्य किञ्चिद् दुष्यति।।

---

[13] अहमविद्यावान् (सुखदुःखादि) अविद्याकार्यवत्वात् व्यतिरेकेण मुक्तात्मवत्।

[14] तत्काले स्वस्याविद्यां प्रति ज्ञातृत्वावस्थायाम्, अविद्यां विषयत्वेन गृहीत्वा तज्ज्ञातृत्वेनैवोपयुक्तत्वस्यात्मनः तस्याः स्वात्मनि कुतः सम्बन्धज्ञातृत्वम्। एकस्य कर्मकर्तृत्वविरोधात्।

[15] यो ग्रहीता स न सम्भवति इति सम्बन्धः। तद्विषयमिति ज्ञातुरविद्याया□सम्बन्धविषयम्।

**आक्षेपः**

ननु अयमेव दोषो यद्दोषवत्क्षेत्र-विज्ञातृत्वम्।।

**समाधानम्**

न। विज्ञान-स्वरूपस्यैवाविक्रियस्य विज्ञातृत्वोपचारात्।

यथोष्णता-मात्रेण अग्नेः तप्ति-क्रियोपचारः तद्वत्।।

यथा अत्र भगवता क्रिया-कारक-फलात्मत्वाभावः आत्मनि स्वत एव दर्शितः अविद्याध्यारोपितैः[16] एव क्रिया-कारकाद्यात्मन्युपचर्यते, तथा तत्र तत्र य एनं वेत्ति हन्तारम् (गी २.१९) प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः (गी ३.२७) नादत्ते कस्यचित् पापं (गी ५.१५) इत्यादि-प्रकरणेषु दर्शितः।

तथैव च व्याख्यातमस्माभिः। उत्तरेषु च प्रकरणेषु दर्शयिष्यामः।।

[16] अविद्याध्यारोपितः इति पाठभेदः।

**आक्षेपः**

हन्त तर्हि आत्मनि क्रिया-कारक-फलात्मतायाः स्वतोऽभावे अविद्यया चाध्यारोपितत्वे

कर्माण्यविद्वत्कर्त्तव्यान्येव न विदुषामिति प्राप्तम्।।

**समाधानम्**

सत्यमेवं प्राप्तम्। एतदेव च न हि देह-भृता शक्यम् (गी १८.११) इत्यत्र दर्शयिष्यामः।

सर्व-शास्त्रार्थोपसंहार-प्रकरणे च समासेनैव कौन्तेय निष्ठा ज्ञानस्य या परा (गी १८.५०) इत्यत्र विशेषतो

दर्शयिष्यामः। अलमिह बहु-प्रपञ्चेन इत्युप-संह्रियते।। २ ।।

"इदं शरीरम्" इत्यादिश्लोकोपदिष्टस्य क्षेत्राध्यायार्थस्य संग्रहश्लोकोयमुपन्यस्यते "तत्क्षेत्रं यच्च"

इत्यादि व्याचिख्यासितस्य ह्यर्थस्य संग्रहोपन्यासः न्याय्य इति -

**तत्क्षेत्रं यच्च यादृक्च यद्विकारि यतश्च यत्।**

**स च यो यत्प्रभावश्च तत्समासेन मे शृणु।। ३ ।।**

यच्च (इदंनिर्दिष्टम्) तत्क्षेत्रं यादृक्च, यद्विकारि, यतश्च यत् (उत्पद्यते), यः (क्षेत्रज्ञः इति निर्दिष्टः) स च यत्प्रभावश्च तत्समासेन मे (वाक्यतः) शृणु।। ३ ।।

तदिति। यन्निर्दिष्टम् इदं शरीरम् इति तत् तच्छब्देन परामृशति। **यच्च** इदं निर्दिष्टं **क्षेत्रम्**।

**तद् यादृग्** यादृशं स्वकीयैर्धर्मैः। च-शब्दः समुच्चयार्थः। **यद्विकारि** यो विकारो यस्य तद्यद्विकारि।

**यतः** यस्माच्च **यत्** कार्यमुत्पद्यते इति वाक्य-शेषः। **स च यः** क्षेत्रज्ञो निर्दिष्टः सः **यत्प्रभावः** ये प्रभावा

उपाधि-कृताः शक्तयो यस्य स यत्प्रभावश्च। **तत्** क्षेत्र-क्षेत्रज्ञयोर्याथात्म्यं यथा-विशेषितं **समासेन** संक्षेपेन

**मे** मम वाक्यतः **शृणु**। श्रुत्वा अवधारयेत्यर्थः।। ३ ।।

क्षेत्रक्षेत्रज्ञयोर्याथात्म्यं विवक्षितं स्तौति श्रोतृबुद्धिप्ररोचनार्थम् -

**ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक्।**

**ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः।। ४।।**

यत् ऋषिभिः विविधैः छन्दोभिः विनिश्चितैः हेतुमद्भिः ब्रह्म-सूत्र-पदैश्चैव पृथक् बहुधा गीतम्।। ४।।

ऋषिभिरिति। **ऋषिभिः** वसिष्ठादिभिः **बहुधा** बहु-प्रकारं **गीतं** कथितं **छन्दोभिः** छन्दांसि ऋगादीनि तैः छन्दोभिः **विविधैः** नाना-प्रकारैः **पृथग्** विवेकतो गीतम्। किञ्च **ब्रह्मसूत्र-पदैश्चैव** ब्रह्मणः सूचकानि वाक्यानि ब्रह्म-सूत्राणि तैः पद्यते गम्यते ज्ञायते ब्रह्मेति तानि पदान्युच्यन्ते।

तैरेव च क्षेत्र-क्षेत्रज्ञयोर्याथात्म्यं गीतमित्यनुवर्त्तते। आत्मेत्योवोपासीत (बृ. १.४.७) इत्यादिभिर्ब्रह्म-सूत्र-पदैरात्मा ज्ञायते।

**हेतुमद्भिः** युक्ति-युक्तैः **विनिश्चितैः** न संशय-रूपैः। निश्चित-प्रत्ययोत्पादकैरित्यर्थः।। ४ ।।

स्तुत्या अभिमुखीभूताय अर्जुनाय आह -

**महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च।**

**इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः।। ५ ।।**

महाभूतानीति। **महाभूतानि** महान्ति च तानि सर्व-विकार-व्यापकत्वाद्भूतानि च सूक्ष्माणि। स्थूलानि तु इन्द्रिय-गोचर-शब्देनाभिधायिष्यन्ते। **अहङ्कारः** महाभूत-कारणम् अहं-प्रत्यय-लक्षणः। अहङ्कार-कारणं **बुद्धिः** अध्यवसाय-लक्षणा। तत्कारणम् **अव्यक्तं** **एव** **च** न व्यक्तमव्यक्तम् अव्याकृतमीश्वर-शक्तिः मम माया दुरत्यया (गी ७.१४) इत्युक्तम्। एव-शब्दः प्रकृत्यवधारणार्थः। एतावत्येवाष्टधा भिन्ना प्रकृतिः। च-शब्दो भेद-समुच्चयार्थः। **इन्द्रियाणि** **दश** श्रोत्रादीनि पञ्च बुद्ध्युत्पादकत्वाद् बुद्धीन्द्रियाणि। वाक्-पाण्यादीनि पञ्च कर्म-निर्वर्त्तकानि कर्मेन्द्रियाणि। तानि दश। **एकं** **च** किं तत् मनः एकादशं सङ्कल्पाद्यात्मकम्। **पञ्च** **च** **इन्द्रियगोचराः** शब्दादयो विषयाः। तान्येतानि सांख्याश्चतुर्विंशति-

तत्त्वान्याचक्षते।। ५ ।।

अथ इदानीमात्मगुणाः इति यान् आचक्षते वैशेषिकाः तेऽपि क्षेत्रधर्माः एव न तु क्षेत्रज्ञस्य इत्याह भगवान्।

**इच्छाद्वेषः सुखं दुःखं सङ्घातश्चेतना धृतिः।**

**एतत्क्षेत्रं समासेन सविकारमुदाहृतम्।। ६ ।।**

इच्छेति। **इच्छा** यज्ञातीयं सुख-हेतुमर्थमुपलब्धवान् पूर्वं, पुनस्तज्ञातीयमुपलभमानस्तम् आदातुमिच्छति सुख-हेतुरिति सेयमिच्छा, अन्तः-करण-धर्मो ज्ञेयत्वात् क्षेत्रम्।

तथा **द्वेषः** यज्ञातीयमर्थं दुःख-हेतुत्वेनानुभूतवान् पुनस्तज्ञातीयमर्थमुपलभमानस्तं द्वेष्टि सोऽयं द्वेषः, ज्ञेयत्वात् क्षेत्रमेव। तथा **सुखम्** अनुकूलं प्रसन्नं सत्त्वात्मकं ज्ञेयत्वात् क्षेत्रमेव।

**दुःखं** प्रतिकूलात्मकं ज्ञेयत्वात्तदपि क्षेत्रम्। **सङ्घातः** देहेन्द्रियाणां संहतिः।

तस्यामभिव्यक्ता अन्तः-करण-वृत्तिः तप्त इव लोह-पिण्डेऽग्निः आत्म-चैतन्याभास-रस-विद्धा **चेतना**, सा

च क्षेत्रं ज्ञेयत्वात्।

**धृतिः** ययाऽवसाद-प्राप्तानि देहेन्द्रियाणि ध्रियन्ते। सा च ज्ञेयत्वात् क्षेत्रम्।

सर्वान्तः-करण-धर्मोपलक्षणार्थमिच्छादि-ग्रहणम्।

यत उक्तं तदुपसंहरति **एतत्क्षेत्रं** **समासेन** **सविकारं** सह विकारेण महदादिना **उदाहृतम्** उक्तम्।। ६ ।।

यस्य क्षेत्र-भेद-जातस्य संहतिः इदं शरीरं क्षेत्रम् इत्युक्तं तत् क्षेत्रं व्याख्यातं महाभूतादि-भेद-भिन्नं

धृत्यन्तम्। क्षेत्रज्ञो वक्ष्यमाण-विशेषणः। क्षेत्रज्ञः वक्ष्यमाणविशेषणः । यस्य सप्रभावस्य क्षेत्रज्ञस्य

परिज्ञानाद् अमृतत्वं भवति तं **"**ज्ञेयं यत्तत्प्रवक्ष्यामि**"** इत्यादिना सविशेषणं स्वयमेव वक्ष्यति भगवान्।

अधुना तु तद्ज्ञानसाधनगणम् अमानित्वादिलक्षणं यस्मिन् सति तद्ज्ञेयविज्ञाने योग्यः अधिकृतः भवति,

यत्परः संन्यासी ज्ञाननिष्ठः उच्यते तममानित्वादिगणं ज्ञानसाधनत्वाद् ज्ञानशब्दवाच्यं विदधाति भगवान्

-

**अमानित्वमदम्भित्वम् अहिंसा क्षान्तिरार्जवम्।**

**आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः।। ७ ।।**

अमानित्वमिति। **अमानित्वं** मानिनो भावो मानित्वमात्मनः श्लाघनं तदभावोऽमानित्वम्।

**अदम्भित्वं** स्व-धर्म-प्रकटी-करणं दम्भित्वं तदभावोऽदम्भित्वम्।

**अहिंसा** अहिंसनं प्राणिनामपीडनम्।

**क्षान्तिः** परापराध-प्राप्तावविक्रिया।

**आर्जवम्** ऋजु-भावोऽवक्रत्वम्।

**आचार्योपासनं** मोक्ष-साधनोपदेष्टुराचार्यस्य शुश्रूषादि-प्रयोगेण सेवनम्।

**शौचं** काय-मलानां मृज्जलाभ्यां प्रक्षालनम्, अन्तश्च मनसः प्रतिपक्ष-भावनया रागादि-मलानामपनयनं शौचम्।

**स्थैर्यं** स्थिर-भावो मोक्ष-मार्ग एव कृताध्यवसायत्वम्।

**आत्मविनिग्रहः** आत्मनः अपकारकस्य आत्म-शब्द-वाच्यस्य कार्य-करण-सङ्घातस्य विनिग्रहः, स्वभावेन सर्वतः प्रवृत्तस्य सन्मार्गे एव निरोधः आत्म-विनिग्रहः।। ७ ।।

किञ्च -

**इन्द्रियार्थेषु वैराग्यम् अनहङ्कार एव च ।**

**जन्म-मृत्यु-जरा-व्याधि-दुःख-दोषानुदर्शनम् ।। ८ ।।**

इन्द्रियार्थेष्विति। **इन्द्रियार्थेषु** शब्दादिषु दृष्टादृष्टेषु भोगेषु, विराग-भावः **वैराग्यम्** **अनहङ्कारः** अहङ्काराभावः **एव** **च**।

**जन्म-मृत्यु-जरा-व्याधि-दुःख-दोषानु-दर्शनं** जन्म च मृत्युश्च जरा च व्याधयश्च दुःखानि च तेषु जन्मादि-दुःखान्तेषु प्रत्येकं दोषानुदर्शनम्।

जन्मनि गर्भ-वास-योनि-द्वारा निःसरणं दोषः, तस्यानुदर्शनमालोचनम्। तथा मृत्यौ दोषानुदर्शनम्।

तथा जरायां प्रज्ञा-शक्ति-तेजो-निरोध-दोषानुदर्शनं परिभूतता चेति।

तथा व्याधिषु शिरो-रोगादिषु दोषानुदर्शनम्। तथा दुःखेष्वध्यात्माधिभूताधिदैव-निमित्तेषु।

अथवा दुःखान्येव दोषो दुःख-दोषः। तस्य जन्मादिषु पूर्ववदनुदर्शनम्।

दुःखं जन्म, दुःखं मृत्युः, दुःखं जरा, दुःखं व्याधयः।

दुःख-निमित्तत्वाज्जन्मादयो दुःखं, न पुनः स्वरूपेणैव दुःखमिति।

एवं जन्मादिषु दुःख-दोषानुदर्शनाद् देहेन्द्रिय-विषय-भोगेषु वैराग्यमुपजायते।

ततः प्रत्यगात्मनि प्रवृत्तिः करणानामात्म-दर्शनाय।

एवं ज्ञान-हेतुत्वाद् ज्ञानमुच्यते जन्मादि-दुःख-दोषानुदर्शनम्।। ८ ।।

किञ्च -

**असक्तिरनभिष्वङ्गः पुत्र-दार-गृहादिषु।**

**नित्यं च सम-चित्तत्वम् इष्टानिष्टोपपत्तिषु।। ९ ।।**

असक्तिरिति। **असक्तिः** सक्तिः सङ्ग-निमित्तेषु विषयेषु प्रीति-मात्रं, तदभावोऽसक्तिः।

**अनभिष्वङ्गः** अभिष्वङ्गाभावः। अभिष्वङ्गो नाम आसक्ति-विशेष एव, अनन्यात्म-भावना-लक्षणः, यथाऽन्यस्मिन् सुखिनि दुःखिनि वा अहमेव सुखी, दुःखी च जीविते मृते वा अहमेव जीवामि, मरिष्यामि च इति। क्वेत्याह - **पुत्रदारगृहादिषु** पुत्रेषु दारेषु गृहेषु, आदि-ग्रहणादन्येष्वप्यत्यन्तेष्टेषु दास-वर्गादिषु।

तच्चोभयं ज्ञानार्थत्वाद् ज्ञानमुच्यते। **नित्यं च समचित्तत्वम्** तुल्य-चित्तता। क्व **इष्टानिष्टोपपत्तिषु** इष्टानामनिष्टानां चोपपत्तयः संप्राप्तयः तास्विष्टानिष्टोपपत्तिषु नित्यमेव तुल्य-चित्तता। इष्टोपपत्तिषु न हृष्यति, न कुप्यति चानिष्टोपपत्तिषु। तच्चैतन्नित्यं सम-चित्तत्वं ज्ञानम्।। ९ ।।

किञ्च -

**मयि चानन्ययोगेन भक्तिरव्यभिचारिणी।**

**विविक्त-देश-सेवित्वम् अरतिर्जनसंसदि।। १० ।।**

मयि इति। **मयि** चेश्वरे **अनन्ययोगेन** अपृथक्समाधिना नान्यो भगवतो वासुदेवात् परोऽस्त्यतः स एव नो गतिः इत्येवं निश्चिता अव्यभिचारिणी बुद्धिरनन्य-योगः, तेन भजनं **भक्तिः** न व्यभिचरण-शीला **अव्यभिचारिणी**। सा च ज्ञानम्।

**विविक्तदेशसेवित्वं** विविक्तः स्वभावतः संस्कारेण वा अशुच्यादिभिः सर्प-व्याघ्रादिभिश्च रहितः अरण्य-नदी-पुलिन-देव-गृहादिभिर्विविक्तो देशः, तं सेवितुं शीलमस्येति विविक्त-देश-सेवी, तद्भावो विविक्त-देश-सेवित्वम्। विविक्तेषु हि देशेषु चित्तं प्रसीदति यतस्ततः आत्मादि-भावना विविक्ते उपजायते।

अतः विविक्त-देश-सेवित्वं ज्ञानमुच्यते।

**अरतिः** अरमणम्। क्व **जनसंसदि**। जनानां प्राकृतानां संस्कार-शून्यानामविनीतानां संसत् समवायो जन-

संसद्, न संस्कारवतां विनीतानां संसत्, तस्या ज्ञानोपकारकत्वात्।

अतः प्राकृत-जन-संसदि अरतिर्ज्ञानार्थत्वाज्ज्ञानम्।। १०  ।।

किञ्च -

**अध्यात्मज्ञान-नित्यत्वं तत्त्वज्ञानार्थ-दर्शनम्।**

**एतज्ज्ञानमिति प्रोक्तम् अज्ञानं यदतोऽन्यथा।। ११ ।।**

अध्यात्मेति। **अध्यात्मज्ञाननित्यत्वम्** आत्मादि-विषयं ज्ञानमध्यात्म-ज्ञानं तस्मिन् नित्य-भावो नित्यत्वम्।

अमानित्वादीनां ज्ञान-साधनानां भावना-परिपाक-निमित्तं **तत्त्व-ज्ञानं** तस्यार्थो मोक्षः संसारोपरमः

तस्यालोचनं **तत्त्वज्ञानार्थदर्शनम्**। तत्त्व-ज्ञान-फलालोचने हि तत्साधनानुष्ठाने प्रवृत्तिः स्यादिति।

**एतद्** अमानित्वादि-तत्त्व-ज्ञानार्थ-दर्शनान्तमुक्तं **ज्ञानमिति** **प्रोक्तं** ज्ञानार्थत्वात्।

**अज्ञानं** **यद्** **अतः** अस्माद्यथोक्ताद् **अन्यथा** विपर्ययेण। मानित्वं, दम्भित्वं, हिंसा, अक्षान्तिः,

अनार्जवमित्याद्यज्ञानं विज्ञेयं परिहरणाय, संसार-प्रवृत्ति-कारणत्वादिति।। ११ ।।

**अवतरण**

यथोक्तेन ज्ञानेन ज्ञातव्यं किमित्याकाङ्क्षायामाह - ज्ञेयं यत् तदित्यादि।

**आक्षेपः**

ननु यमा नियमाश्च अमानित्वादयः। न तैर्ज्ञेयं ज्ञायते। न ह्यमानित्वादि कस्यचिद्वस्तुनः परिच्छदेकं

दृष्टम्। सर्वत्रैव च यद्विषयं ज्ञानं तदेव तस्य ज्ञेयस्य परिच्छेदकं दृश्यते।

न हि अन्य-विषयेण ज्ञानेनान्यदुपलभ्यते। यथा घट-विषयेण ज्ञानेनाग्निः।

**समाधानम्**

नैष दोषः। ज्ञाननिमित्तत्वाज्ज्ञानमुच्यते इति ह्यवोचाम। ज्ञान-सहकारि-कारणत्वाच्च।।

**ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते।**

**अनादिमत् परं ब्रह्म न सत्तन्नासदुच्यते।। १२ ।।**

यत् ज्ञेयं (मुमुक्षुभिः) यत् ज्ञात्वा (विद्वान्) अमृतमश्नुते तत् (वस्तु) प्रवक्ष्यामि । अनादिमत् परं ब्रह्म (ज्ञेयम्)। तत् सद् (इति) न उच्यते। असद् (इति च) न उच्यते।।

ज्ञेयमिति। **ज्ञेयं** ज्ञातव्यं **यत्तत् प्रवक्ष्यामि** प्रकर्षेण यथावद्वक्ष्यामि।

किं-फलं तदिति प्ररोचनेन श्रोतुरभिमुखीकरणायाह - **यद्** ज्ञेयं **ज्ञात्वा** **अमृतम्** अमृतत्वम् **अश्नुते** पुनर्न म्रियते इत्यर्थः। **अनादिमद्** आदिरस्यास्तीत्यादिमत्, नाऽऽदिमदनादिमत्।

किं तत् **परं** निरतिशयं **ब्रह्म** ज्ञेयमिति प्रकृतम्।।

अत्र केचिद् अनादि मत्परम् इति पदं छिन्दन्ति। बहुव्रीहिणोक्तेऽर्थे मतुप आनर्थक्यमनिष्टं स्यादिति।

अर्थ-विशेषं च दर्शयन्ति - अहं वासुदेवाख्या परा शक्तिर्यस्य तन्मत्परमिति।

सत्यमेवमपुनरुक्तं स्यात् अर्थश्चेत्सम्भवति। न त्वर्थः सम्भवति।

ब्रह्मणः सर्व-विशेष-प्रतिषेधेनैव विजिज्ञापयिषितत्वात्, न सत्तन्नासदुच्यते इति। विशिष्ट-शक्तिमत्व-प्रदर्शनं विशेष-प्रतिषेधश्चेति विप्रतिषिद्धम्। तस्मान्मतुपो बहुव्रीहिणा समानार्थत्वेऽपि प्रयोगः श्लोक-पूरणार्थः।।

अमृतत्व-फलं ज्ञेयं मयोच्यते इति प्ररोचनेनाभिमुखीकृत्याह - न सत् तज्ज्ञेयमुच्यते इति नाप्यसत्तदुच्यते।।

**आक्षेपः**

ननु महता परिकर-बन्धेन कण्ठ-रवेणोद्घुष्य ज्ञेयं प्रवक्ष्यामि इति, अननुरूपमुक्तं न सत्तन्नासदुच्यते इति।

**समाधानम्**

न। अनुरूपमेवोक्तम्।

**आक्षेपः**

कथम्

**समाधानम्**

सर्वासु ह्युपनिषत्सु ज्ञेयं ब्रह्म नेति नेति (बृ. ४.४.२२) अस्थूलमनणु (बृ. ३.८.८) इत्यादि-विशेष-

प्रतिषेधेनैव निर्दिश्यते। न इदं तत् इति, वाचोऽगोचरत्वात्।

**आक्षेपः**

ननु न तदस्ति, यद्वस्तु अस्ति-शब्देन नोच्यते। अथ अस्ति-शब्देन नोच्यते नास्ति तज्ज्ञेयम्। विप्रतिषिद्धं

च ज्ञेयं तत् अस्ति-शब्देन नोच्यतेइति च।

**समाधानम्**

न तावन्नास्ति, नास्तिबुद्ध्यविषयत्वात्।

**आक्षेपः**

ननु सर्वा बुद्धयोऽस्ति-नास्ति-बुद्ध्यनुगता एव।

तत्रैवं सति ज्ञेयमप्यस्ति-बुद्ध्यनुगत-प्रत्यय-विषयं वा स्यात्। नास्तिबुद्ध्यनुगत-प्रत्यय-विषयं वा स्यात्।

**समाधानम्**

न, अतीन्द्रियत्वेनोभय-बुद्ध्यनुगत-प्रत्ययाविषयत्वात्।

यद्धीन्द्रिय-गम्यं वस्तु घटादिकं, तदस्ति-बुद्ध्यनुगत-प्रत्यय-विषयं वा स्यात्।

नास्तिबुद्ध्यनुगत-प्रत्यय-विषयं वा स्यात्। इदं तु ज्ञेयं अतीन्द्रियत्वेन शब्दैक-प्रमाण-गम्यत्वान्न घटादिवद् उभय-बुद्ध्यनुगत-प्रत्यय-विषयमित्यतः न सत्तन्नासदित्युच्यते। यत्तूक्तं विरुद्धमुच्यते ज्ञेयं तत् न सत्तन्नासदुच्यते इति। न विरुद्धम् अन्यदेव तद्विदितादथो अविदितादधि (केन १.३) इति श्रुतेः।

**आक्षेपः**

श्रुतिरपि विरुद्धार्थेति चेत्, यथा यज्ञाय शालामारभ्य को हि तद्वेद यद्यमुष्मिँल्लोकेऽस्ति वा न वेति[17](तै.आ. ६.१.१) इत्येवमिति चेत्।

[17] प्राचीनवंशं करोतीति पारलौकिक-फल-यज्ञानुष्ठानार्थं शालानिर्माणं प्रस्तुत्य को हि तद्वेद इत्याद्या परलोकसत्त्वे सन्दिहाना यथा तथा।

**समाधानम्**

न। विदिताविदिताभ्यामन्यत्व-श्रुतेरवश्य-विज्ञेयार्थ-प्रतिपादनपरत्वात्।

यद्यमुष्मिन् इत्यादि तु विधि-शेषोऽर्थवादः।

उपपत्तेश्च। सदादि-शब्दैर्ब्रह्म नोच्यते इति। सर्वो हि शब्दोऽर्थ-प्रकाशनाय प्रयुक्तः, श्रूयमाणश्च श्रोतृभिः,

जाति-गुण-क्रिया-सम्बन्ध-द्वारेण संकेत-ग्रहणं सव्यपेक्षोऽर्थं प्रत्याययति। नान्यथा, अदृष्टत्वात्।

तद्यथा गौरश्वश्च इति वा जातितः, पचति पठतीति वा क्रियातः, शुक्लः कृष्ण इति वा गुणतः,

धनी गोमानिति वा सम्बन्धतः। न तु ब्रह्म जातिमत्। अतो न सदादि-शब्द-वाच्यम्।

नापि गुणवद्येन गुण-शब्देनोच्यते निर्गुणत्वात्।

नापि क्रिया-शब्द-वाच्यं निष्क्रियत्वात् निष्कलं निष्क्रियं शान्तम्(श्वे. ६.१९) इति श्रुतेः।

न च सम्बन्धी एकत्वाद्, अद्वयत्वाद्, अविषयत्वाद्, आत्मत्वाच्च न केनचित् शब्देनोच्यते इति युक्तम्,

यतो वाचो निवर्त्तन्ते (तै. २.९) इत्यादि-श्रुतिभ्यश्च।। १२ ।।

सच्छब्द-प्रत्ययाविषयत्वाद् असत्व-शङ्कायां ज्ञेयस्य सर्व-प्राणि-करणोपाधि-द्वारेण तदस्तित्वं प्रतिपादयन्

तदाशङ्का-निवृत्यर्थमाह -

सच्छब्दप्रत्ययाविषयत्वात् असत्वशङ्कायां ज्ञेयस्य सर्वप्राणि-करणोपाधिद्वारेण तदस्तित्वं प्रतिपादयन्

तदाशङ्कानिवृत्यर्थम् आह -

**सर्वतः पाणि-पादं तत् सर्वतोऽक्षिशिरोमुखम्।**

**सर्वतःश्रुतिमल्लोके सर्वमावृत्य तिष्ठति।। १३।।**

सर्वत इति। **सर्वतः पाणिपादं** सर्वतः पाणयः पादाश्चास्येति सर्वतः पाणिपादं तज्ज्ञेयम्।

सर्व-प्राणि-करणोपाधिभिः क्षेत्रज्ञास्तित्वं विभाव्यते। क्षेत्रज्ञश्च क्षेत्रोपाधित उच्यते।

क्षेत्रं च पाणि-पादादिभिरनेकधा भिन्नम्। क्षेत्रोपाधि-भेद-कृतं विशेष-जातं मिथ्यैव क्षेत्रज्ञस्य, इति

तदपनयनेन ज्ञेयत्वमुक्तम् न सत्तन्नासदुच्यते (गी २.१६) इति।

उपाधिकृतं मिथ्या-रूपमपि अस्तित्वाधिगमाय ज्ञेय-धर्मवत् परिकल्प्योच्यते सर्वतः पाणि-पादमित्यादि।

तथाहि सम्प्रदाय-विदां वचनम् - अध्यरोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते इति।

सर्वत्र सर्व-देहावयवत्वेन गम्यमानाः पाणि-पादादयो ज्ञेय-शक्ति-सद्भाव-निमित्त-स्व-कार्याः[18] इति ज्ञेय-

सद्भावे लिङ्गानि ज्ञेयस्येत्युपचारत उच्यन्ते। तथा व्याख्येयम् अन्यत्। सर्वतः पाणिपादं तज्ज्ञेयम्।

**सर्वतोऽक्षिशिरोमुखं** सर्वतः अक्षीणि शिरांसि मुखानि च यस्य तत् सर्वतोऽक्षि-शिरो-मुखम्।

**सर्वतःश्रुतिमत्** श्रुतिः श्रवणेन्द्रियं तद्यस्य तत् श्रुतिमत्, **लोके** प्राणि-निकाये।

**सर्वमावृत्य** संव्याप्य **तिष्ठति** स्थितिं लभते।। १३ ।।

---

[18] ज्ञेयस्य ब्रह्मणः शक्तयः ज्ञानबलक्रियात्मिकाः तासां सद्भावः अस्तित्वं निमित्तं येषां तानि स्वकार्याणि ग्रहणादीनि येषां ते।

उपाधिभूतपाणिपादादीन्द्रियाध्यारोपणाद् ज्ञेयस्य तद्वत्ताशङ्का माभूदित्येवमर्थः श्लोकारम्भः -

सर्वेन्द्रियेति।

**सर्वेन्द्रिय-गुणाभासं सर्वेन्द्रिय-विवर्जितम्।**

**असक्तं सर्वभृच्चैव निर्गुणं गुण-भोक्तृ च ।। १४ ।।**

सर्वेन्द्रियेति। **सर्वेन्द्रियगुणाभासं** सर्वाणि च तानीन्द्रियाणि श्रोत्रादीनि बुद्धीन्द्रिय-कर्मेन्द्रियाख्यानि,

अन्तःकरणे च, बुद्धि-मनसी, ज्ञेयोपाधित्वस्य तुल्यत्वात् सर्वेन्द्रिय-ग्रहणेन गृह्येते।

अपि च अन्तः-करणोपाधि-द्वारेणैव श्रोत्रादीनामप्युपाधित्वमित्यतः अन्तः-करण-बहिष्करणोपाधि-भूतैः

सर्वेन्द्रिय-गुणैः अध्यवसाय-सङ्कल्प-श्रवण-वचनादिभिः अवभासते इति सर्वेन्द्रिय-गुणाभासम्।

सर्वेन्द्रिय-व्यापारैर्व्यापृतमिव तद् ज्ञेयमित्यर्थः। ध्यायतीव लेलायतीव (बृ. ४.३.७) इति श्रुतेः।

कस्मात् पुनः कारणान्न व्यापृतमेवेति गृह्यते इत्यत आह - **सर्वेन्द्रियविवर्जितं** सर्व-करण-रहितमित्यर्थः।

अतो न करण-व्यापारैर्व्यापृतं तज्ज्ञेयम्।

यस्त्वयं मन्त्रः अपाणि-पादो जवनो ग्रहीता पश्यत्यचक्षुः स श्रृणोत्यकर्णः (श्वे. ३.१९) इत्यादिः स सर्वेन्द्रियोपाधि-गुणानुगुण्य-भजन-शक्तिमत् तज्ज्ञेयमित्येवं प्रदर्शनार्थः, न तु साक्षादेव जवनादि-क्रियावत्त्व-प्रदर्शनार्थः। अन्धो मणिमविन्दत् (तै.आ. १.११) इत्यादि-मन्त्रार्थवत्तस्य मन्त्रस्यार्थः।

यस्मात् सर्व-करण-वर्जितं ज्ञेयं तस्माद् **असक्तं** सर्व-संश्लेष-वर्जितम्। यद्यप्येवं तथापि **सर्वभृच्चैव**। सदास्पदं हि सर्वं, सर्वत्र सद्बुद्ध्यनुगमात्। न हि मृग-तृष्णिकादयोऽपि निरास्पदा भवन्ति। अतः सर्वभृत् सर्वं बिभर्त्तीति। स्यादिदं चान्यज्ज्ञेयस्य सत्वाधिगम-द्वारम्।

**निर्गुणं** सत्व-रजस्-तमांसि गुणाः तैर्वर्जितं तज्ज्ञेयम्। तथापि **गुणभोक्तृ** **च** गुणानां सत्व-रजस्-तमसां शब्दादि-द्वारेण सुख-दुःख-मोहाकार-परिणतानां भोक्तृ चोपलब्धृ तद् ज्ञेयमित्यर्थः।। १४।।

किञ्च -

**बहिरन्तश्च भूतानाम् अचरं चरमेव च।**

**सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तत्।। १५ ।।**

बहिरिति। **बहिः** त्वक्-पर्यन्तं देहमात्मत्वेनाऽविद्याकल्पितमपेक्ष्य तमेवावधिं कृत्वा बहिरुच्यते। तथा प्रत्यगात्मानमपेक्ष्य देहमेवावधिं कृत्वा **अन्तः** उच्यते। बहिरन्तश्चेत्युक्ते मध्येऽभावे प्राप्ते इदमुच्यते **अचरं** **चरमेव** **च** यच्चराचरं देहाभासमपि तदेव ज्ञेयं यथा रज्जु-सर्पाभासः। यद्यचरं चरमेव च स्याद्व्यवहार-विषयं सर्वं ज्ञेयं, किमर्थम् इदम् इति सर्वैर्न विज्ञेयमिति। उच्यते। सत्यं सर्वाभासं तत्, तथापि व्योमवत् सूक्ष्मम्। अतः **सूक्ष्मत्वात्** स्वेन रूपेण **तद्** ज्ञेयमपि **अविज्ञेयम्** अविदुषाम्। विदुषां तु आत्मैवेदं सर्वम् (बृ. ४.४.६, छा. ७.२५.२) ब्रह्मैव इदं सर्वम् (बृ. ४.५.१, नृ.उ.ता. ७) इत्यादि-प्रमाणतो नित्यं विज्ञातम्। अविज्ञाततया **दूरस्थं** वर्ष-सहस्र-कोट्याप्यविदुषाम् अप्राप्यत्वात्। **अन्तिके** **च** तदात्मत्वाद्विदुषाम्।। १५ ।।

किञ्च -

**अविभक्तं च भूतेषु विभक्तमिव च स्थितम्।**

**भूत-भर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च।। १६ ।।**

अविभक्तमिति। **अविभक्तं** **च** प्रति-देहं व्योमवत्तदेकम्।

**भूतेषु** सर्व-प्राणिषु **विभक्तमिव** **च** **स्थितं** देहेष्वेव विभाव्यमानत्वात्।

**भूतभर्तृ** **च** भूतानि बिभर्त्तीति **तज्ज्ञेयम्**। भूत-भर्त्तृ च स्थिति-काले।

प्रलय-काले **ग्रसिष्णु** ग्रसन-शीलम्।

उत्पत्ति-काले **प्रभविष्णु** च प्रभवन-शीलं यथा रज्ज्वादिः सर्पादेर्मिथ्या-कल्पितस्य।। १६ ।।

किञ्च सर्वत्र विद्यमानमपि सन्नोपलभ्यते चेत्, ज्ञेयं तमस्तर्हि। न। किं तर्हि -

**ज्योतिषामपि तज्ज्योतिः तमसः परमुच्यते।**

**ज्ञानं ज्ञेयं ज्ञान-गम्यं हृदि सर्वस्य विष्ठितम्।। १७ ।।**

ज्योतिषामपीति। **ज्योतिषाम्** आदित्यादीनामपि **तद्** ज्ञेयं **ज्योतिः**। आत्म-चैतन्य-ज्योतिषा इद्धानि ह्यादित्यादीनि ज्योतींषि दीप्यन्ते येन सूर्यस्तपति तेजसेद्धः (तै.ब्रा. ३.१२.९) तस्य भासा सर्वमिदं विभाति (श्वे. ६.१४) इत्यादि-श्रुतिभ्यः। स्मृतेश्चेहैव यदादित्यगतं तेजः (गी. १५.१२) इत्यादेः।

**तमसः** अज्ञानात् **परम्** अस्पृष्टम् **उच्यते**। ज्ञानादेर्दुःसंपादन-बुद्ध्या प्राप्तावसादस्योत्तम्भनार्थमाह - **ज्ञानम्** अमानित्वादि। **ज्ञेयं** ज्ञेयं यत्तत्प्रवक्ष्यामि इत्यादिनोक्तम्। **ज्ञानगम्यं** ज्ञेयमेव ज्ञातं सज्ज्ञान-फलमिति ज्ञानगम्यमुच्यते। ज्ञायमानं तु ज्ञेयम्। तदेतत् त्रयमपि **हृदि** बुद्धौ **सर्वस्य** प्राणि-जातस्य **विष्ठितं** विशेषेण स्थितम्। तत्रैव हि त्रयं विभाव्यते।। १७ ।।

यथोक्तार्थोपसंहारार्थोऽयं श्लोक आरभ्यते -

**इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः।**

**मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते।। १८ ।।**

इति क्षेत्रमिति। **इति** एवं **क्षेत्रं** महा-भूतादि-धृत्यन्तम् (५-६)। **तथा ज्ञानम्** अमानित्वादि तत्त्व-ज्ञानार्थ-दर्शन-पर्यन्तम् (७-११)। **ज्ञेयं च** ज्ञेयं यत्तत् इत्यादि तमसः परमुच्यते इत्येवमन्तम् (१२-१७)। **उक्तं समासतः** संक्षेपतः। एतावान्सर्वो हि वेदार्थो गीतार्थश्चोपसंहृत्योक्तः। अस्मिन् सम्यग्दर्शने कोऽधिक्रियते इत्युच्यते। **मद्भक्तः** मयीश्वरे सर्वज्ञे परम-गुरौ वासुदेवे समर्पित-सर्वात्म-भावः, यत्पश्यति श्रृणोति स्पृशति वा सर्वमेव भगवान् वासुदेवः इत्येवं-ग्रहाविष्ट-बुद्धिर्मद्भक्तः। स **एतद्** यथोक्तं सम्यग्दर्शनं **विज्ञाय मद्भावाय** मम भावो मद्भावः परमात्म-भावः तस्मै मद्भावाय **उपपद्यते** मोक्षं गच्छति।। १८ ।।

तत्र सप्तमे ईश्वरस्य द्वे प्रकृती उपन्यस्ते परापरे क्षेत्र-क्षेत्रज्ञ-लक्षणे। एतद्योनीनि भूतानि (गी ७.६) इति

चोक्तम्। क्षेत्र-क्षेत्रज्ञ-प्रकृति-द्वय-योनित्वं कथं भूतानामिति। अयमर्थोऽधुनोच्यते[19] -

**प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि।**

**विकारांश्च गुणांश्चैव विद्धि प्रकृति-सम्भवान्।। १९ ।।**

प्रकृतिमिति। **प्रकृतिं** **पुरुषं** **चैव** ईश्वरस्य प्रकृती तौ प्रकृति-पुरुषौ **उभावपि** **अनादी** **विद्धि**।

न विद्यते आदिर्ययोः तावनादी। नित्येश्वरत्वाद् ईश्वरस्य[20] तत्प्रकृत्योरपि युक्तं नित्यत्वेन भवितुम्।

प्रकृति-द्वयवत्त्वमेव हि ईश्वरस्येश्वरत्वम्। याभ्यां प्रकृतिभ्यामीश्वरो जगदुत्पत्ति-स्थिति-प्रलय-हेतुः।

ते द्वे अनादी सत्यौ संसारस्य कारणम्।

न आदी अनादी इति[21] तत्पुरुष-समासं केचिद्वर्णयन्ति। तेन हि किलेश्वरस्य कारणत्वं सिध्यति।

---

[19] यत□यत् इत्यस्य प्रश्नस्योत्तरम्।

[20] नित्यत्वाद् ईश्वरस्य इति वा

यदि पुनः प्रकृति-पुरुषावेव नित्यौ स्यातां तत्कृतमेव जगत्, नेश्वरस्य जगतः कर्त्तृत्वम्। तदसत्।

प्राक्प्रकृति-पुरुषयोरुत्पत्तेः ईशितव्याभावाद् ईश्वरस्यानीश्वरत्व-प्रसङ्गात्।

संसारस्य निर्निमित्तत्वेऽनिर्मोक्षत्व-प्रसङ्गात्, शस्त्रानर्थक्य-प्रसङ्गाद् बन्ध-मोक्षाभाव-प्रसङ्गाच्च।

नित्यत्वे पुनरीश्वरस्य प्रकृत्योः सर्वमेतदुपपन्नं भवेत्। कथम् **विकारांश्च** **गुणांश्चैव** वक्ष्यमाणान् विकारान् बुद्ध्यादि-देहेन्द्रियान् तान् गुणांश्च सुख-दुःख-मोह-प्रत्ययाकार-परिणतान् **विद्धि** जानीहि **प्रकृतिसम्भवान्** प्रकृतिः ईश्वरस्य विकार-कारण-शक्तिः त्रिगुणात्मिका माया सा सम्भवः येषां विकाराणां गुणानां च तान् विकारान् गुणान् च विद्धि प्रकृति-सम्भवान् प्रकृति-परिणामान्।। १९ ।।

---

[21] आदिरिति कारणमुच्यते।

के पुनः ते विकारा गुणाश्च प्रकृति-सम्भवाः - कार्येति।

**कार्य-करण-कर्तृत्वे हेतुः प्रकृतिरुच्यते ।**

**पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते।। २० ।।**

**कार्यकरणकर्त्तृत्वे** कार्यं शरीरं करणानि तत्स्थानि त्रयोदश[22]।

देहस्यारम्भकाणि भूतानि, पञ्च विषयाश्च, प्रकृति-सम्भवा विकाराः पूर्वोक्ता इह कार्य-ग्रहणेन गृह्यन्ते।

गुणाश्च प्रकृति-सम्भवाः सुख-दुःख-मोहात्मकाः करणाश्रयत्वात् करण-ग्रहणेन गृह्यन्ते। तेषां कार्य-करणानां कर्त्तृत्वमुत्पादकत्वं यत्तत् कार्य-करण-कर्त्तृत्वं तस्मिन् कार्य-करण-कर्त्तृत्वे **हेतुः** कारणमारम्भकत्वेन **प्रकृतिरुच्यते**। एवं कार्य-करण-कर्त्तृत्वेन संसारस्य कारणं प्रकृतिः।

**कार्यकारणकर्त्तृत्व** इत्यस्मिन्नपि पाठे कार्यं यद्यस्य विपरिणामः तत्तस्य कार्यं विकारः, विकारी कारणम्।

[22] ज्ञानेन्द्रियपञ्चकं कर्मेन्द्रियपञ्चकं मनो बुद्धिरहङ्कारश्च इति।।

तयोः विकार-विकारिणोः कार्य-कारणयोः कर्त्तृत्व इति। अथवा, षोडश विकाराः कार्यम्। सप्त प्रकृति-विकृतयः कारणम्। तान्येव कार्य-कारणान्युच्यन्ते। तेषां कर्त्तृत्वे **हेतुः** **प्रकृतिरुच्यते** आरम्भकत्वेनैव।

पुरुषश्च संसारस्य कारणं यथा स्यात्तदुच्यते।

**पुरुषः** जीवः क्षेत्रज्ञो भोक्तेति पर्यायः **सुखदुःखानां** भोग्यानां **भोक्तृत्वे** उपलब्धृत्वे **हेतुरुच्यते**।।

कथं पुनरनेन कार्य-करण-कर्त्तृत्वेन सुख-दुःख-भोक्तृत्वेन च प्रकृति-पुरुषयोः संसार-कारणत्वमुच्यते इति। अत्रोच्यते। कार्य-करण-सुख-दुःख-रूपेण हेतु-फलात्मना प्रकृतेः परिणामाभावे, पुरुषस्य चेतनस्यासति तदुपलब्धृत्वे कुतः संसारः स्यात्। यदा पुनः कार्य-करण-सुख-दुःख-रूपेण हेतु-फलात्मना परिणतया प्रकृत्या भोग्यया सह पुरुषस्य तद्विपरीतस्य भोक्तृत्वेनाविद्या-रूपः संयोगः स्यात् तदा संसारः स्यादिति। अतो यत् प्रकृति-पुरुषयोः कार्य-करण-कर्तृत्वेन सुख-दुःख-भोक्तृत्वेन च संसार-कारणत्वमुक्तं तद् युक्तमुक्तम्। कः पुनरयं संसारो नाम। सुख-दुःख-सम्भोगः संसारः। पुरुषस्य च सुख-दुःखानां सम्भोक्तृत्वं संसारित्वमिति।। २० ।।

यत्पुरुषस्य सुख-दुःखानां सम्भोक्तृत्वं संसारित्वमित्युक्तं तस्य तत्किंनिमित्तमित्युच्यते -

**पुरुषः प्रकृतिस्थो हि भु□प्रकृतिजान् गुणान्।**

**कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु।। २१ ।।**

पुरुष इति। **पुरुषः**[23] भोक्ता **प्रकृतिस्थः** प्रकृतौ अविद्या-लक्षणायां कार्य-करण-रूपेण परिणतायां स्थितः प्रकृतिस्थः प्रकृतिमात्मत्वेन गत इत्येतत्। **हि** यस्मात, तस्मात् **भु□**उपलभते इत्यर्थः। **प्रकृतिजान्** प्रकृतितः जातान् सुख-दुःख-मोहाकाराभिव्यक्तान् **गुणान्** सुखी, दुःखी, मूढः, पण्डितोऽहम् इत्येवम्।

[23] *Here the word puruṣa refers to the jīva as Śankara says:*
पुरुषः, भोक्ता, प्रकृतिस्थः—प्रकृतौ अविद्यालक्षणायां कार्यकारणरूपेण परिणतायां स्थितः प्रकृतिस्थः—प्रकृतिम् आत्मभावेन गतः इत्येतत्। शा० भा०।।
*The puruṣa, the enjoyer obtains in the prakṛti, which is of the nature of ignorance and takes himself to be the (modification of the) prakṛti.*

सत्यामप्यविद्यायां[24] सुख-दुःख-मोहेषु गुणेषु भुज्यमानेषु यः सङ्गः आत्म-भावः संसारस्य स प्रधानं कारणमस्य पुरुषस्य जन्मनः, स यथा-कामो भवति तत्क्रतुः[25] भवति (बृ. ६.४.५) इत्यादि-श्रुतेः।

तदेतदाह **कारणं** हेतुः **गुणसङ्गः** गुणेषु सङ्गोऽस्य पुरुषस्य भोक्तुः **सदसद्योनिजन्मसु** सत्यश्चासत्यश्च योनयः सदसद्योनयः तासु सदसद्योनिषु जन्मानि सदसद्योनि-जन्मानि तेषु सदसद्योनि-जन्मसु विषय-भूतेषु कारणं गुण-सङ्गः। अथवा सदसद्योनि-जन्मसु अस्य संसारस्य कारणं गुण-सङ्ग इति संसार-पदमध्याहार्यम्। सद्योनयः देवादि-योनयः। असद्योनयः पश्वादि-योनयः। सामर्थ्यात् सदसद्योनयः मनुष्य-योनयोऽप्यविरुद्धा द्रष्टव्याः।। २१ ।।

---

24 न सा प्रधानकारणम्।

25 तत्कर्तुः इति पाठभेदः।

एतदुक्तं भवति। प्रकृतिस्थत्वाख्या[26] अविद्या, गुणेषु च सङ्गः कामः, संसारस्य कारणमिति।

तच्च परिवर्जनायोच्यते। अस्य च निवृत्ति-कारणं ज्ञानं वैराग्यं ससंन्यासं[27] गीतशास्त्रे प्रसिद्धम्।

तच्च ज्ञानं पुरस्तादुपन्यस्तं क्षेत्र-क्षेत्रज्ञ-विषयम्। यज्ज्ञात्वा अमृतमश्नुते (गी. १३.१२) इत्युक्तं

चान्यापोहेन[28] अतद्धर्माध्यारेपेण[29] च। तस्यैव पुनः साक्षाद् निर्देशः क्रियते -

**उपद्रष्टानुमन्ता च भर्त्ता भोक्ता महेश्वरः।**

**परमात्मेति चाप्युक्तः देहेऽस्मिन् पुरुषः परः ।। २२ ।।**

उपद्रष्टेति। उपद्रष्टा समीपस्थः सन्द्रष्टा स्वयमव्यापृतः। यथा ऋत्विग्यजमानेषु यज्ञ-कर्म-व्यापृतेषु तटस्थः

अन्यः[30] अव्यापृतो यज्ञ-विद्या-कुशलः ऋत्विग्यजमान-व्यापार-गुण-देषाणाम् ईक्षिता तद्वत् कार्य-

करण-व्यापारेष्वव्यापृतोऽन्यो विलक्षणस्तेषां कार्य-करणानां सव्यापाराणां सामीप्येन द्रष्टोपद्रष्टा।

---

[26] प्रकृतितत्त्वाख्या इति पाठभेदः।
[27] ज्ञानवैराग्ये ससंन्यासे इति पाठभेदः।
[28] न सत्तन्नासदुच्यते इत्यन्तेन।
[29] सर्वतः पाणिपादमित्यादिना।
[30] ऋत्विग् ब्रह्मा।

अथवा देह-चक्षुर्मनोबुद्ध्यात्मनो द्रष्टारः। तेषां बाह्यो द्रष्टा देहः।

तत आरभ्यान्तरतमश्च प्रत्यक् समीपे आत्मा द्रष्टा। यतः परोऽन्तरतमो नास्ति द्रष्टा, सोऽतिशय-सामीप्येन द्रष्टृत्वादुपद्रष्टा स्यात्। यज्ञोपद्रष्टृवद्वा सर्व-विषयी-करणाद् उपद्रष्टा।

**अनुमन्ता** च अनुमोदनं अनुमननं, कुर्वत्सु तत्क्रियासु परितोषः तत्कर्त्ताऽनुमन्ता[31] च।

अथवा अनुमन्ता कार्य-करण-प्रवृत्तिषु स्वयमप्रवृत्तोऽपि प्रवृत्त इव तदनुकूलो विभाव्यते तेनानुमन्ता।

अथवा प्रवृत्तान् स्व-व्यापारेषु तत्साक्षि-भूतः कदाचिदपि न निवारयतीत्यनुमन्ता।

**भर्त्ता** भरणं नाम देहेन्द्रिय-मनो-बुद्धीनां संहतानां चैतन्यात्म-पारार्थ्येन निमित्त-भूतेन चैतन्याभासानां यत्स्वरूप-धारणं तत् चैतन्यात्म-कृतमेवेति भर्त्ता आत्मेत्युच्यते।

[31] अन्येषु क्रियाः कुर्वत्सु सत्सु तत्क्रियासु विषये परितोषकर्त्ता, स्वयमकुर्वन्नपि कृतकृत्य इव तृप्यति।

**भोक्ता** अग्न्युष्णवत् नित्य-चैतन्य-स्वरूपेण बुद्धेः सुख-दुःख-मोहात्मकाः प्रत्ययाः सर्व-विषय-विषयाश्चैतन्यात्म-ग्रस्ता इव जायमाना विभक्ता विभाव्यन्ते इति भोक्ता आत्मा उच्यते।

**महेश्वरः** सर्वात्मत्वात् स्वतन्त्रत्वाच्च महान् ईश्वरश्चेति महेश्वरः।

**परमात्मा** देहादीनां बुद्ध्यन्तानां प्रत्यगात्मत्वेन कल्पितानाम् अविद्यया परमः उपद्रष्टृत्वादि-लक्षणः आत्मेति परमात्मा। सोऽन्तः परमात्मा **इति** अनेन शब्देन **चाप्युक्तः** कथितः श्रुतौ।

क्वासौ **अस्मिन्देहे** **पुरुषः** **परः** अव्यक्तात्। उत्तमः पुरुषः त्वन्यः परमात्मेत्युदाहृतः (गी १५.१७) इति यो वक्ष्यमाणः। क्षेत्रज्ञं चापि मां विद्धि (गी १३.२) इत्युपन्यस्तो व्याख्यायोपसंहृतश्च।। २२ ।।

तमेतं यथोक्तलक्षणं आत्मानम् -

**य एवं वेत्ति पुरुषं प्रकृतिं च गुणैस्सह।**

**सर्वथा वर्त्तमानोऽपि न स भूयोऽभिजायते।। २३ ।।**

य एवमिति। **य** **एवं** यथोक्त-प्रकारेण **वेत्ति** **पुरुषं** साक्षादात्म-भावेन अयमहमस्मि इति **प्रकृतिं** **च** यथोक्तामविद्या-लक्षणां **गुणैः** स्व-विकारैः **सह** निवर्त्तिताम् अभावमापादितां विद्यया **सर्वथा** सर्व-प्रकारेण **वर्त्तमानोऽपि** सः **भूयः** पुनः पतितेऽस्मिन् विद्वच्छरीरे देहान्तराय नाभिजायते नोत्पद्यते। देहान्तरं न गृह्णातीत्यर्थः। अपि-शब्दात् किमु वक्तव्यं स्व-वृत्तस्थो न जायते इत्यभिप्रायः।।

**आक्षेपः**

ननु यद्यपि ज्ञानोत्पत्त्यनन्तरं पुनर्जन्माभाव उक्तः, तथापि प्राग्ज्ञानोत्पत्तेः कृतानां कर्मणाम्, उत्तर-काल-भाविनां च, यानि चातिक्रान्तानेकजन्मकृतानि तेषां च, फलमदत्वा नाशो न युक्त इति। स्युः त्रीणि जन्मानि, कृत-विप्रणाशो हि न युक्त इति। यथा फले प्रवृत्तानामारब्ध-जन्मनां कर्मणाम्।

न च कर्मणां विशेषोऽवगम्यते। तस्मात् त्रि-प्रकाराण्यपि कर्माणि त्रीणि जन्मान्यारभेरन्।

संहतानि वा सर्वाण्येकं जन्म आरभेरन्। अन्यथा कृत-विप्रणाशे सति सर्वत्रानाश्वास-प्रसङ्गः,

शास्त्रानर्थक्यं च, स्यादित्यत इदमयुक्तमुक्तं न स भूयोऽभिजायते इति।।

**समाधानम्**

न। क्षीयन्ते चास्य कर्माणि(मु. २.२.८) ब्रह्म वेद ब्रह्मैव भवति (मु. ३.२.९) तस्य तावदेव चिरम् (छा.

६.१४.२) इषीका-तूलवत् सर्वाणि कर्माणि प्रदूयन्ते (छा. ५.२४.३) इत्यादि-श्रुति-शतेभ्य उक्तो विदुषः

सर्व-कर्म-दाहः। इहापि चोक्तः यथैधांसि (गी ४.३७) इत्यादिना सर्व-कर्म-दाहः। वक्ष्यति च।

उपपत्तेश्च। अविद्या-काम-क्लेश-बीज-निमित्तानि हि कर्माणि जन्मान्तराङ्कुरमारभन्ते।

इहापि च साहङ्काराभिसन्धीनि कर्माणि फलारम्भकाणि नेतराणीति तत्र तत्र भगवतोक्तम्।

बीजान्यग्न्युपदग्धानि न रोहन्ति यथा पुनः।

ज्ञान-दग्धैस्तथा क्लेशैर्नात्मा सम्पद्यते पुनः (म.भा.शां. १११.१७, वन १९९.१०७) इति च।।

**आक्षेपः**

अस्तु तावज्ज्ञानोत्पत्तेरुत्तर-काल-कृतानां कर्मणां ज्ञानेनैव दाहः ज्ञान-सहभावित्वात्।

न त्विह जन्मनि ज्ञानोत्पत्तेः प्राक्कृतानां कर्मणाम्, अतीतजन्मकृतानां च दाहो युक्तः।।

**समाधानम्**

न। सर्व-कर्माणि इति विशेषणात्।

**आक्षेपः**

ज्ञानोत्तर-काल-भाविनामेव सर्व-कर्मणामिति चेत्।

**समाधानम्**

न सङ्कोचत्वे कारणानुपपत्तेः।

यत्तूक्तं यथा वर्त्तमान-जन्मारम्भकाणि कर्माणि न क्षीयन्ते फल-दानाय प्रवृत्तान्येव सत्यपि ज्ञाने,

तथा अनारब्ध-फलानामपि कर्मणां क्षयो न युक्त इति तदसत्। कथम् तेषां मुक्तेषुवत् प्रवृत्त-फलत्वात्।

यथा पूर्वं लक्ष्य-वेधाय मुक्त इषुर्धनुषो लक्ष्य-वेधोत्तर-कालमप्यारब्ध्वेग-क्षयात्पतनेनैव निवर्त्तते,

एवं शरीरारम्भकं कर्म शरीर-स्थिति-प्रयोजने निवृत्तेऽपि आसंस्कार-वेग-क्षयात् पूर्ववद्वर्त्तते एव।

स एव इषुः प्रवृत्ति-निमित्तानारब्ध-वेगस्त्वमुक्तो धनुषि प्रयुक्तोऽप्युपसंह्रियते तथा अनारब्ध-फलानि कर्माणि स्वाश्रयस्थानि एव ज्ञानेन निर्बीजी क्रियन्ते इति पतितेऽस्मिन् विद्वच्छरीरे न स भूयोऽभिजायते इति युक्तमेवोक्तमिति सिद्धम्।। २३ ।।

अत्र आत्म-दर्शने उपाय-विकल्पा इमे ध्यानादय उच्यन्ते -

**ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना।**

**अन्ये साङ्ख्येन योगेन कर्म-योगेन चापरे ।। २४ ।।**

ध्यानेनेति। **ध्यानेन** ध्यानं नाम शब्दादिभ्यो विषयेभ्यः श्रोत्रादीनि करणानि मनसि उपसंहृत्य, मनश्च प्रत्यक्चेतयितरि, एकाग्रतया यच्चिन्तनं तत् ध्यानम्। तथा ध्यायतीव बको ध्यायतीव पृथिवी ध्यायन्तीव पर्वताः इत्युपमोपादानात् तैल-धारावत् सन्ततोऽविच्छिन्न-प्रत्ययो ध्यानम्। तेन ध्यानेन **आत्मनि** बुद्धौ **पश्यन्ति** **आत्मानं** प्रत्यक्चेतनम् **आत्मना** स्वेनैव प्रत्यक्चेतनेन[32] ध्यान-संस्कृतेन अन्तःकरणेन **केचिद्** योगिनः। **अन्ये** **सांख्येन** **योगेन** सांख्यं नाम इमे सत्व-रजस्-तमांसि गुणा मया दृश्याः, अहं तेभ्योऽन्यः, तद्व्यापार-साक्षि-भूतो नित्यो गुण-विलक्षण आत्मा इति चिन्तनम्। एष सांख्यो योगः। तेन पश्यन्ति आत्मानमात्मना इति वर्त्तते। **कर्मयोगेन** कर्मैव योगः ईश्वरार्पण-बुद्ध्या अनुष्ठीयमानं घटन-रूपं योगार्थत्वाद्योग उच्यते गुणतः। तेन सत्व-शुद्धि-ज्ञानोत्पत्ति-द्वारेण **चापरे**।। २४ ।।

---

[32] स्वेनैव प्रत्यक्चेतनेन इति क्वचिन्न।

**अन्ये त्वेवमजानन्तः श्रुत्वान्येभ्यः उपासते ।**

**तेऽपि चातितरन्त्येव मृत्युं श्रुति-परायणाः।। २५ ।।**

एवमजानन्तः अन्ये तु अन्येभ्यः श्रुत्वा उपासते। श्रुति-परायणाः ते च अपि मृत्युं अतितरन्ति एव ।। २५ ।।

अन्येत्विति। **अन्ये** **तु** एतेषु विकल्पेष्वन्यतमेनापि **एवम्** यथोक्तमात्मानम् **अजानन्तः** **अन्येभ्यः** आचार्येभ्यः **श्रुत्वा** इदमेव चिन्तयत इत्युक्ताः **उपासते** श्रद्दधानाः सन्तः चिन्तयन्ति।

**तेऽपि** **चातितरन्त्येव** अतिक्रामन्त्येव **मृत्युं** मृत्यु-युक्तं संसारमित्येतत्।

**श्रुतिपरायणाः** श्रुतिः श्रवणं परमयनं गमनं मोक्षमार्गप्रवृत्तौ परं साधनं येषां ते श्रुति-परायणाः।

केवलं परोपदेश-प्रमाणकाः स्वयं विवेक-रहिताः इत्यभिप्रायः।

किमु वक्तव्यं प्रमाणं प्रति स्वतन्त्राः विवेकिनो मृत्युमतितरन्तीत्यभिप्रायः।। २५ ।।

क्षेत्रज्ञेश्वरैकत्व-विषयं ज्ञानं मोक्ष-साधनं यज्ज्ञात्वाऽमृतमश्नुते (गी १३.१२) इत्युक्तम्।

तत्कस्मात् हेतोरिति तद्धेतु-प्रदर्शनार्थं श्लोक आरभ्यते -

**यावत्सञ्जायते किञ्चित् सत्वं स्थावर-जङ्गमम्।**

**क्षेत्र-क्षेत्रज्ञ-संयोगात् तद्विद्धि भरतर्षभ।। २६ ।।**

यावदिति। **यावत्** यत् **किञ्चित्** **सञ्जायते** समुत्पद्यते **सत्वं** वस्तु। किमविशेषेण नेत्याह - **स्थावरजङ्गमं**

स्थावरं च जङ्गमं च। **क्षेत्रक्षेत्रज्ञसंयोगात्** **तद्** जायते इत्येवं **विद्धि** विजानीहि। हे **भरतर्षभ**।

कः पुनरयं क्षेत्र-क्षेत्रज्ञयोः संयोगः अभिप्रेतः।

न तावद् रज्ज्वेव घटस्यावयव-संश्लेष-द्वारकः सम्बन्ध-विशेषः संयोगः क्षेत्रेण क्षेत्रज्ञस्य सम्भवति।

आकाशवन्निरवयवत्वात्।

नापि समवाय-लक्षणः तन्तु-पटयोः इव क्षेत्र-क्षेत्रज्ञयोः इतरेतर-कार्य-कारण-भावानभ्युप-गमादिति।

उच्यते। क्षेत्र-क्षेत्रज्ञयोर्विषय-विषयिणोर्भिन्न-स्वभावयोरितरेतर-तद्धर्माध्यास-लक्षणः संयोगः क्षेत्र-क्षेत्रज्ञ-स्वरूप-विवेकाभाव-निबन्धनो रज्जु-शुक्तिकादीनां तद्विवेक-ज्ञानाभावादध्यारोपित-सर्प-रजतादि-संयोगवत्। सोऽयं अध्यास-स्वरूपः क्षेत्र-क्षेत्रज्ञ-संयोगः मिथ्या-ज्ञान-लक्षणः।

यथा-शास्त्रं क्षेत्र-क्षेत्रज्ञ-लक्षण-भेद-परिज्ञानपूर्वकं प्राग्दर्शित-रूपात् क्षेत्रात् मुञ्जादिव ईषीकां यथोक्त-लक्षणं क्षेत्रज्ञं प्रविभज्य न सत्तन्नासदुच्यते (गी १३.१२) इत्यनेन निरस्त-सर्वोपाधि-विशेषं ज्ञेयं ब्रह्म स्वरूपेण यः पश्यति, क्षेत्रं च माया-निर्मित-हस्ति-स्वप्न-दृष्ट-वस्तु-गन्धर्व-नगरादिवत् असदेव सदिव अवभासते इत्येवं निश्चित-विज्ञानो यः, तस्य यथोक्त-सम्यग्दर्शन-विरोधाद् अपगच्छति मिथ्या-ज्ञानम्।

तस्य जन्महेतोरपगमात् य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह (गी १३.२३) इत्यनेन विद्वान् भूयो नाभिजायते इति यदुक्तं तदुपपन्नमुक्तम्।। २६ ।।

न स भूयोऽभिजायते (गी १३.२३) इति सम्यग्दर्शन-फलम् अविद्यादि-संसार-बीज-निवृत्ति-द्वारेण जन्माभाव उक्तः। जन्म-कारणं च अविद्या-निमित्तकः क्षेत्र-क्षेत्रज्ञ-संयोग उक्तः।

अतस्तस्या अविद्याया निवर्त्तकं सम्यग्दर्शनमुक्तमपि पुनः शब्दान्तरेणोच्यते -

**समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम्।**

**विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति।। २७ ।।**

सममिति। **समं** निर्विशेषं **तिष्ठन्तं** स्थितिं कुर्वन्तम्। क्व **सर्वेषु** **भूतेषु** ब्रह्मादि-स्थावरान्तेषु प्राणिषु। कम् **परमेश्वरं** देहेन्द्रिय-मनो-बुद्ध्यव्यक्तात्मनोऽपेक्ष्य परमेश्वरः तं सर्वेषु भूतेषु समं तिष्ठन्तम्। तानि विशिनष्टि **विनश्यत्सु** इति, तं च परमेश्वरम् **अविनश्यन्तम्** इति, भूतानां परमेश्वरस्य च अत्यन्त-वैलक्षण्य-प्रदर्शनार्थम्। कथम् सर्वेषां हि भाव-विकाराणां जनि-लक्षणो भाव-विकारो मूलम्। जन्मोत्तर-भाविनोऽन्ये सर्वे विकाराः विनाशान्ताः।

विनाशात् परो न कश्चिदस्ति भाव-विकारो भावाभावात्। सति हि धर्मिणि धर्मा भवन्ति।

अतोऽन्त्य-भाव-विकाराभावानुवादेन पूर्व-भाविनः सर्वे भाव-विकाराः प्रतिषिद्धा भवन्ति सह कार्यैः।

तस्मात् सर्व-भूतैर्वैलक्षण्यमत्यन्तमेव परमेश्वरस्य सिद्धं निर्विशेषत्वमेकत्वं च।

**यः** एवं यथोक्तं परमेश्वरं **पश्यति** **स** **पश्यति**।

**आक्षेपः**
ननु सर्वोऽपि लोकः पश्यति, किं विशेषणेनेति।

**समाधानम्**
सत्यं पश्यति, किन्तु विपरीतं पश्यति। अतो विशिनष्टि स एव पश्यति इति।

यथा तिमिर-दृष्टिरनेकं चन्द्रं पश्यति तमपेक्ष्य एक-चन्द्र-दर्शी विशिष्यते स एव पश्यति इति,

तथैवेहाप्येकमविभक्तं यथोक्तमात्मानं यः पश्यति स विभक्तानेकात्मविपरीत-दर्शिभ्यो विशिष्यते स एव पश्यति इति। इतरे पश्यन्तोऽपि न पश्यन्ति, विपरीत-दर्शित्वादनेक-चन्द्र-दर्शिवदित्यर्थः।। २७ ।।

यथोक्तस्य सम्यग्दर्शनस्य फल-वचनेन स्तुतिः कर्त्तव्येति श्लोक आरभ्यते -

**समं पश्यन्हि सर्वत्र समवस्थितमीश्वरम्।**

**न हिनस्त्यात्मनाऽऽत्मानं ततो याति परां गतिम्।। २८ ।।**

सममिति। **समं** **पश्यन्** उपलभमानः **हि** यस्मात् **सर्वत्र** सर्व-भूतेषु **समवस्थितं** तुल्यतया अवस्थितम् **ईश्वरम्** अतीतानन्तर-श्लोकोक्त-लक्षणमित्यर्थः। समं पश्यन् किम् **न** **हिनस्ति** हिंसां न करोति **आत्मना** स्वेनैव स्वम् **आत्मानम्**। **ततः** तदहिंसनाद् **याति** **परां** प्रकृष्टां **गतिं** मोक्षाख्याम्।।

**आक्षेपः**

ननु नैव कश्चित् प्राणी स्वयं स्वमात्मानं हिनस्ति। कथमुच्यतेऽप्राप्तं न हिनस्ति इति।

यथा न पृथिव्यामग्निश्चेतव्यो नान्तरिक्षे इत्यादि।

**समाधानम्**

नैष दोषः। अज्ञानामात्म-तिरस्करणोपपत्तेः। सर्वो ह्यज्ञोऽत्यन्त-प्रसिद्धं साक्षादपरोक्षादात्मानं तिरस्कृत्य

अनात्मानमात्मत्वेन परिगृह्य तमपि धर्माधर्मौ कृत्वोपात्तमात्मानं हत्वा अन्यमात्मानम् उपादत्ते।

नवं तं चैवं हत्वान्यमेवं, तमपि हत्वान्यम् इत्येवम्, उपात्तमुपात्तमात्मानं हन्ति इत्यात्महा सर्वोऽज्ञः।

यस्तु परमार्थात्मा असावपि सर्वदा अविद्यया हत इव विद्यमान-फलाभावाद् इति सर्वे आत्महन एव

अविद्वांसः। यस्तु इतरो यथोक्तात्मदर्शी स उभयथाप्यात्मनात्मानं न हिनस्ति। ततो याति परां गतिम्।

यथोक्तं फलं तस्य भवतीत्यर्थः।। २८ ।।

**संबन्धभाष्य २९**

सर्वभूतस्थम् ईशं समं पश्यन् न हिनस्ति आत्मना आत्मानम् इति उक्तं तद् अनुपपन्नं

स्वगुणकर्मवैलक्षण्यभेदभिन्नेषु आत्मसु इति एतद् आशङ्क्य आह -

सर्वभूतस्थमीश्वरं समं पश्यन्न हिनस्त्यात्मनात्मानमित्युक्तं तदनुपपन्नं स्व-गुण-कर्म-वैलक्षण्य-भेद-

भिन्नेष्वात्मसु[33] इत्येतदाशङ्क्याह -

**प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः।**

**यः पश्यति तथात्मानम् अकर्तारं स पश्यति।। २९ ।।**

प्रकृत्येति। **प्रकृत्या** प्रकृतिर्भगवतो माया, त्रिगुणात्मिका, मायां तु प्रकृतिं विद्यात्(श्वे. ४.२०) इति मन्त्र-

वर्णात्। तया प्रकृत्या **एव** **च** नान्येन, महदादि-कार्य-कारणाकार-परिणतया **कर्माणि** वाङ्-मनः-

कायारभ्याणि **क्रियमाणानि** निर्वर्त्यमानानि **सर्वशः** सर्व-प्रकारैः **यः** **पश्यति** उपलभते। **तथात्मानम्**

क्षेत्रज्ञम् **अकर्त्तारं** सर्वोपाधि-विवर्जितं **स** **पश्यति**। सः परमार्थ-दर्शी इत्यभिप्रायः।

निर्गुणस्याकर्त्तुर्निर्विशेषस्य आकाशस्येव भेदे प्रमाणानुपपत्तिरित्यर्थः। २९ ।।

---

33 स्वगुणैः सुखदुःखादिभिः स्वकर्मभिश्च धर्माधर्माख्यैः वैलक्षण्यात् प्रतिदेहं भेदे तद्विशिष्टेष्वात्मसु कथं साम्येन दर्शनमित्याक्षेपः।

पुनरपि तदेव सम्यग्दर्शनं शब्दान्तरेण प्रपञ्चयति -

**यदा भूतपृथग्भावम् एकस्थमनुपश्यति।**

**तत एव च विस्तारं ब्रह्म सम्पद्यते तदा ।। ३० ।।**

यदेति। **यदा** यस्मिन्काले **भूतपृथग्भावं** भूतानां पृथग्भावं पृथक्त्वम् **एकस्थम्** एकस्मिन्नात्मनि स्थितमेकस्थम् **अनुपश्यति** शास्त्राचार्योपदेशमनु आत्मानं प्रत्यक्षत्वेन[34] पश्यति आत्मैवेदं सर्वम् (छा. ७.२५.२) इति। **तत एव च** तस्मादेव च **विस्तारम्** उत्पत्तिं विकासम् आत्मतः प्राणः, आत्मत आशा, आत्मतः स्मरः, आत्मत आकाशः, आत्मतः तेजः, आत्मत आपः, आत्मत आविर्भाव-तिरोभावौ, आत्मतो भूः, आत्मतोऽन्नम् (छा. ७.२६.१) इत्येवमादि-प्रकारैर्विस्तारं यदा पश्यति **ब्रह्म संपद्यते** ब्रह्मैव भवति **तदा** तस्मिन् काल इत्यर्थः।। ३० ।।

[34] शास्त्राचार्योपदेशतो मत्त्वा आत्मप्रत्यक्षत्वेन इति पाठान्तरम्।

एकस्यात्मनः सर्वदेहात्मत्वे तद्दोषसंबन्धे प्राप्ते इदमुच्यते -

**अनादित्वान्निर्गुणत्वात् परमात्मायमव्ययः।**

**शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते ।। ३१ ।।**

अनादित्वादिति। **अनादित्वाद्** अनादेर्भावोऽनादित्वम्। आदिः कारणं तद्यस्य नास्ति तदनादि।

यद्धि आदिमत्तत् स्वेनाऽऽत्मना व्येति, अयं त्वनादित्वान्निरवयव इति कृत्वा न व्येति।

तथा **निर्गुणत्वात्** सगुणो हि गुणव्ययाद् व्येति, अयं तु निर्गुणत्वान्न व्येति इति **परमात्मा** **अयम्** **अव्ययः**

नास्य व्ययो विद्यते इत्यव्ययः। यतः एवमतः **शरीरस्थोऽपि** शरीरेष्वात्मन उपलब्धिर्भवतीति शरीरस्थ

उच्यते तथापि **न** **करोति**। तदकरणादेव तत्फलेन **न** **लिप्यते**।

यो हि कर्त्ता स कर्म-फलेन लिप्यते, अयं त्वकर्त्ता न फलेन लिप्यते इत्यर्थः।

कः पुनर्देहेषु करोति लिप्यते च यदि तावदन्यः परमात्मनो देही करोति लिप्यते च, तत इदमनुपपन्नमुक्तं क्षेत्रज्ञैश्वरैकत्वं क्षेत्रज्ञं चापि मां विद्धि (गी १३.२) इत्यादि। अथ नास्तीश्वरादन्यो देही, कः करोति लिप्यते चेति वाच्यम्। परो वा नास्तीति। सर्वथा दुर्विज्ञेयं दुर्वाच्यं चेति भगवत्प्रोक्तमौपनिषदं दर्शनं परित्यक्तं वैशेषिकैः सांख्यार्हत-बौद्धैश्च।

तत्रायं परिहारो भगवता स्वेनैवोक्तः स्वभावस्तु प्रवर्त्तते (गी ५.१४) इति।

अविद्या-मात्र-स्वभावो हि करोति लिप्यते इति व्यवहारो भवति, न तु परमार्थत एकस्मिन् परमात्मनि [35] तदस्ति। अत एतस्मिन् परमार्थ-सांख्य-दर्शने स्थितानां ज्ञान-निष्ठानां परम-हंस-परिव्राजकानां तिरस्कृताविद्या-व्यवहाराणां कर्माधिकारो नास्तीति तत्र तत्र दर्शितं भगवता।। ३१ ।।

---

[35] कर्तृत्वभोक्तृत्वे।

किमिव न करोति न लिप्यते इत्यत्र दृष्टान्तमाह -

**यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते।**

**सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते ।। ३२ ।।**

यथेति। **यथा** **सर्वगतं** व्याप्यपि सत् **सौक्ष्म्याद्** सूक्ष्म-भावाद् **आकाशं** खं **नोपलिप्यते** न सम्बध्यते

**सर्वत्रावस्थितो** **देहे** **तथात्मा** **नोपलिप्यते**।। ३२ ।।

किञ्च -

**यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः।**

**क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत।। ३३ ।।**

यथेति। **यथा** **प्रकाशयति** अवभासयति **एकः** **कृत्स्नं** **लोकमिमं** **रविः** सविताऽदित्यः **तथा** तद्वन्महा-भूतादि-धृत्यन्तं **क्षेत्रं** एकः सन् **प्रकाशयति**। कः **क्षेत्री** परमात्मेत्यर्थः।

रवि-दृष्टान्तोऽत्र आत्मन उभयार्थोऽपि भवति रविवत्सर्वक्षेत्रेष्वेक आत्मा अलेपकश्चेति।। ३३ ।।

समस्ताध्यायार्थोपसंहारार्थः अयं श्लोकः -

**क्षेत्र-क्षेत्रज्ञयोरेवम् अन्तरं ज्ञान-चक्षुषा।**

**भूत-प्रकृति-मोक्षं च ये विदुर्यान्ति ते परम्।। ३४।।**

क्षेत्रक्षेत्रज्ञेति। **क्षेत्रक्षेत्रज्ञयोः** यथा-व्याख्यातयोः **एवं** यथा-प्रदर्शित-प्रकारेण **अन्तरम्** इतरेतर-वैलक्षण्य-विशेषं **ज्ञानचक्षुषा** शास्त्राचार्योपदेश-जनितमात्म-प्रत्ययिकं ज्ञानं चक्षुः तेन ज्ञान-चक्षुषा **भूतप्रकृतिमोक्षं च** भूतानां प्रकृतिरविद्या-लक्षणा अव्यक्ताख्या तस्या भूत-प्रकृतेर्मोक्षणमभाव-गमनं च **ये विदुः** विजानन्ति **यान्ति** गच्छन्ति **ते परं** परमार्थ-तत्त्वं ब्रह्म, न पुनर्देहमाददते इत्यर्थः।। ३४।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ श्रीमद्भगवद्गीताभाष्ये त्रयोदशोऽध्यायः।।

ओं तत्सद् इति श्रीमद्भगवगीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे क्षेत्रक्षेत्रज्ञविभागयोगो नाम त्रयोदशोध्यायः।।